सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

अष्टम उन्मेषः
द्वितीयो विलासः
१९७०
VIII 2
1970

साहित्य अकादेमी, नवदेहली

Samskrita Pratibha, a Half-yearly Journal

Editor: Dr. V. Raghavan

Annual Subscription: Rs. 6, 14 *s*. or $ 2 (inclusive of postage)

Single copy: Rs. 3 (inclusive of postage)

Send your literary contributions to the Editor

Send your subscriptions and advertisements to the Secretary, Sahitya Akademi, Rabindra Bhavan, 35, Ferozeshah Road, New Delhi-1.

Advertisement Rates

Inside Full page:	General Rs. 100;	for Books Rs. 50.
Inside Half page:	General Rs. 50;	for Books Rs. 25.
3rd Cover:	General Rs. 150;	for Books Rs. 75.
4th Cover:	General Rs. 200;	for Books Rs. 100.

Mechanical Data
Size: Demy Octavo ($8\frac{1}{2}'' \times 5\frac{1}{2}''$)
Print Area: $7'' \times 4''$
Line Measure: 24-ems

Edited and published by Dr. V. Raghavan for Sahitya Akademi (35, Feroze Shah Road, New Delhi), at 7, Sri Krishnapuram Street, Royapettah, Madras-14; and printed at the M.L.J. Press Private Ltd., Madras-4

सं स्कृ त प्र ति भा

SAMSKRITA PRATIBHA

अष्टम उन्मेषः
द्वितीयो विलासः
१९७०
VIII 2
1970

साहित्य अकादेमी, नवदेहली

संस्कृतप्रतिभा अष्टम उन्मेषः, द्वितीयो विलासः
१९७०
साहित्य-अकादेमी, नवदेहली

विषयानुक्रमणिका—

सम्पादकीयम्

महात्मा गान्धी

खण्डकाव्यानि—

१. अन्यापदेशाः-डा. वे. राघवः १
२. प्रातःपञ्चकम्-ब. च. छापोत्कटः १६
३. विरहगीतिः-प्रियव्रतशर्मा १७
४. प्रवर्ततां भारतभाग्यचक्रम्-विघ्नेश्वरशर्मा १९
५. राधायाः पत्रं कृष्णं प्रति-रामचन्द्रमिश्रः २१
६. वाञ्छसि बन्धो प्रेम यदि त्वम्-हरिश्चन्द्रः रेणापुरकरः २४
७. कालः क्रीडति-एम्. एन्. जोशी २६
८. पितामहपदं धन्यम्-अ. वि. काणे २८
९. सौन्दर्यसमीक्षणम्-टि. जि. सिद्धप्पाराध्यः ३०
१०. कविः-दुर्गादासगोस्वामी ३४

गद्यबन्धः—

११. न मे कर्म विकुरुते-स्वामिनाथ आत्रेयः ३६

रूपके—

१२. महती विचित्रता-दि. म. पाण्ड्यः ४३
१३. मेघोदयः-पि. एस्. सुब्बरामभट्टः ४९

अनुवादाः—

१४. मनोबोधः-विश्वनाथ केशव छत्रे ७१
१५. शिबिका-कालूरि हनुमन्तरावः ७८
१६. मधुसञ्चयः-शैलेन्द्रनाथसिद्धनाथपाठकः ७९
१७. मधुशाला-माधव देशपाण्डे ८०

वैदिकव्याकरणम् (डा. रामगोपालः); विवाहमन्त्रार्थाः (श्रीरामनाथदीक्षितः); व्याससुभाषितसंग्रहः (लु. स्टेर्णबाख्); श्रीमद्भागवतमहिमा (श्रीजयतीर्थाचार्यः); दिव्यसूरि (आल्वार्) चरितानि (श्रीजग्गु वेङ्कटाचार्यः); श्रीमद्वेदान्तदेशिक-वैभवम् (अनु० श्रीदेवनाथदेशिकाचार्यः); परतत्त्वप्रकाशिका (श्रीशेषय्यशास्त्री); वाक्यपदीयम् (अभ्यङ्कर-लिमये); धातुकाव्यम् (नारायणभट्टः-एस्. वेङ्कटसुब्रह्मण्य अय्यर्); कामधेनुः भागः-१ (भरत पिषारटी); मानसरासकेली (महीधर वेङ्कटरामशास्त्री); वेदान्ततत्त्वालोकः (श्रीजनार्दनः- ति. अ. वेङ्कटेश्वरदीक्षितः); स्याद्वादमुक्तावली जैनविशेषतर्कपराभिधा, भावसप्ततिका च (श्रीयशःस्वत्सागरः-सुरेश उपाध्यायः); काशिका-प्रथमो भागः १-४ अध्यायः; गीतगोविन्दम्-टीकात्रयोपेतम्; वृत्तरत्नाकरः (आर्येन्द्रशर्मा-तत्सहकारिणश्च); नारायणीयम् (नारायणभट्टपादः); गीतगीर्वाणम् (श्री. भि. वेलणकरः); श्रीरामकृष्णभागवतम् (रामसुन्दरभक्तितीर्थः); श्रीरामकृष्णकर्णामृतम् (ओट्टूर् उण्णि नम्पूतिरि); टाल्स्टाय्-कथासप्तकम् (भागीरथीप्रसादत्रिपाठी); श्रीमाता, दुर्गास्तोत्रम् (अरविन्दः-जगन्नाथः) यथा ते रोचते (षेक्स्पियर्-अनन्तत्रिपाठिशर्मा); भारतस्वातन्त्र्यम् (वामन कृष्ण चितले); मागधम्-गान्धिदर्शनम् (आरा); शारदा (पूना); पाटलश्रीः (पाट्ना); श्रीनेहरूचरितम् (ब्रह्मानन्दशुक्लः); उपदेशामृतम्, ज्योतिःस्फुलिङ्गः, अर्जुनमालाकारम् (चन्दनमुनिः); कालिदाससम्पुटः (दवङ्गरे); त्रिपुरदाहकथा (रामस्वरूपशास्त्री); स्तोत्रमाला (श्रीकृष्णप्रेमी); प्राची (वाराणसी); प्रतिभा (वाराणसी); सुरभारती (बरोडा); विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः (डा० वे. राघवः); आर्यालहरी (पि. नीलकण्ठशर्मा); सरस्वतीकार्यम् (कृ. वा. चितले); शार्दूलशकटम् (वीरेन्द्रकुमारभट्टाचार्यः); तर्जनी (दुर्गादत्तशास्त्री).



"महात्मा"*

बा. वे. मयेकर

महात्मना महात्मानमनुसृत्य गतिर्गता ।
अनादि गत्वा जीवेषा सकुलस्यान्तु उत्कृष्टम् ॥ १ ॥

कुटुम्बिनो मनोवाक्य अगुरुत्वा येन वै जिता ।
दयाऽऽज्ञपत्रमन्विष्टो द्वयो श्रेष्ठ न कोऽप्यभूत् ॥ २ ॥

रक्षा सन्नेकतो. यात्र नासादेक महायत्न ।
जातिविवाद क्रान्त्या कार्यस्य देव पुरुषस्य ॥ ३ ॥

परयोहास्तुत्य वीरानु श्रेष्ठ्यवक्षणम् ।
निर्दन्ता निरहङ्कारो यात्र प्रज्ञा प्रतिष्ठिता ॥ ४ ॥

एष गान्धीव देशेऽस्मिन्नार्य पुण्येऽपि भारते ।
चातुर्वर्ण्यस्य भेदे च महात्मा सुकुलभः ॥ ५ ॥

गीता यज्ञा तथा गीतिगुरुसेवा च पुत्र ।
हेतवो भारतीयास्ते येषु मान्यस्त्वमस्मिन्नः ॥ ६ ॥

मर्मकनेत्रपतद्भुजेच्छयाय
[illegible] ।* *

[illegible] ।

[illegible] ।

[illegible]

[illegible] ॥ ७ ॥

[illegible]

[illegible] ॥ ८ ॥

एकः किल तद्वदये चरणौ चिक्षेप चाहुकौ बुटिकाम् ।
विपरीतचेष्टितैर्नः विद्धं हृदयं पुरैवात्र ॥ ९ ॥

चक्रे [illegible] मद्यत्यागस्य हरिजनाभ्युदयः ।
जातिविवादविरामः सत्यारोदिन्यादिता च ॥ १० ॥

---

* : महात्मगान्धि-मरणसमये उदीर्णाः श्लोकाः ।

"एकैकेन हिन्दुना, बालेन बालिकया वा संस्कृतज्ञानं सम्पादयितव्यम् ; एकैकस्य हिन्दोः संस्कृते तावत् ज्ञानं भवितुमर्हति यावता स प्राप्ते काले तया भाषया स्वाशयमाविष्कर्तुं शक्नुयात् ।"

—म. गान्धी, यङ् इन्दिया १८-८-२७.

"हिन्दोर्यस्य कस्यापि विद्याधिगमः तावता असम्पूर्ण एवेति मन्ये यावता न स प्राप्नोति कियदपि संस्कृतज्ञानम् ।"

—य. इ. १५-१२-२७.

" * * समीचीनप्रकारेण विद्याधिगमक्रमे यावत् कार्यकारि तावत् संस्कृतज्ञानाधिगमनेन च भाव्यम् । श्रीविवेकानन्देन संस्कृते कापि महती शक्तिर्दृष्टा, तस्यां शक्त्यामहमपि श्रद्दधे । संस्कृतज्ञानद्वारा भूयसीनामेव भारतीयभाषाणां, दाक्षिणात्यभाषा अनपहाय, ज्ञानार्थं कापि मूलभूता कुञ्चिका समर्प्यते ।"

—य. इ. २२-४-३३.

"महात्मा"*

डा. वे. राघवः

महात्मना महात्मनामनुत्तमा गतिर्गता ।
असाधि यन्न जीवता तनुत्यजास्तु तत्कृतम् ॥ १ ॥

कुष्ठविष्ठे शोधयता जुगुप्सा येन वै जिता ।
ददतोऽप्यपकारिभ्यो द्वेषो यस्य न कोऽप्यभूत् ॥ २ ॥

रक्षां सन्न्यस्यतो यस्य नासीदेव महाभयम् ।
आततायिन्यपि क्षान्त्या कारुण्यं यत्र पुष्कलम् ॥ ३ ॥

परपीडासहृदये यस्मिन् वैष्णवलक्षणम् ।
निर्द्वन्द्वा निरहङ्कारा यस्य प्रज्ञा प्रतिष्ठिता ॥ ४ ॥

एष गान्धीव देशेऽस्मिन्नार्षे पुण्येऽपि भारते ।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥ ५ ॥

गीता गङ्गा तथा गौरीगुरुश्चेत्यत्र ये पुनः ।
हेतवो भारतोन्नत्यै तेषु गान्ध्यप्यनन्तिमः ॥ ६ ॥

एकैकनेत्रपतदश्रुमृजेच्छयायं
यश्चक्षमे न जगदार्तमिदं विमोक्तुम् ।
उद्धर्तुमेव कृपणां जनतां दरिद्र-
नारायणः स्वयमतप्यत वेषवृत्तैः ॥ ७ ॥

हित्वा तमात्मतप-आर्जितभारतीय-
स्वातन्त्र्यमोदमधिदेहलि चार्धरात्रे ।
यो 'राम-रहीम्' इति जपन् धृतशान्तिवर्तिः
नोखालिगाढतिमिरे प्रचचार पद्भ्याम् ॥ ८ ॥

एकः किल तद्धृदये चरमां चिक्षेप घातुकां घुटिकाम् ।
विपरीतचेष्टितैर्नः विद्धं हृदयं पुरैवास्य ॥ ९ ॥

चक्रं ग्रामोद्धारो मद्यत्यागश्च हरिजनाभ्युदयः ।
जातिविवादविरामः सत्याभेदिन्यहिंसा च ॥ १० ॥

---

* महात्मगान्धि-मरणसमये उदीर्णाः श्लोकाः ।

एतद्धि गान्धिभगवत्षाड्गुण्यं तस्य शाश्वतोऽप्यात्मा ।
पूजयतैतद्भक्त्या तेन स देशश्च पूजितौ नूनम् ॥ ११ ॥

बृहदपि विचित्रतरमपि बह्वपि तत्स्मारकं भवनम् ।
अर्हति लेशस्यापि किमेतद्वचनानुचारसत्यस्य ॥ १२ ॥

मैत्र्या सत्येन तपसा त्यागेन समभावतः ।
भारता भारतं देशं कुरुत स्मारकं परम् ॥ १३ ॥

मैवं बहु विकीर्याश्रु दुर्बलीकुरुतात्मनः ।
तद्वाक्याचरणाद्धर्मात्स्तोत्रैर्मा चापधावत ॥ १४ ॥

अनृतो द्वेषी हिंस्रः कोऽपि न तस्यास्थि भस्म वा स्पृशतु ।
निन्दकचराश्च नुतिभिः प्रहसनमधुना न कुर्वन्तु ॥ १५ ॥

बुद्धो बभूव स बभूव च जेसुकृस्तुः
गान्ध्यप्यभूत्स शममेव वदन् हतश्च ।
शान्तिः कदा बत मृगत्वविजित्वरा स्यात्
अर्हा भवेम च कदा नु महात्मनां नः ॥ १६ ॥

रात्रौ कुर्वन्नणुस्फोटं सर्वदेशसभा दिवा ।
हे लोक यद्यार्जवं ते गान्धिनो दर्शनं शृणु ॥ १७ ॥

अध्यात्मीचक्रेऽसौ क्रूरं कूटं च राज्यतन्त्रं यः ।
सत्याग्रहेण तपसा योऽप्यचलांश्चालयामास ॥ १८ ॥

"सत्यान्नास्ति परो देवः नाहिंसातोऽप्युपासना ।
समत्वं परमो योगो वसुधैकं कुटुम्बकम्" ॥ १९ ॥

एष आदेश एषो व उपदेशो महात्मनः ।
एषैव वेदोपनिषत् 'अहिंसैवैकतारकम्' ॥ २० ॥

परस्परं नाभ्यहिंसन् यस्मिंस्तद् गान्धिनेप्सितम् ।
रामराज्यं जगत्यस्तु रामगान्धिप्रसादतः ॥ २१ ॥*

सम्पादकीयम् —

तिरुप्पतिक्षेत्रे केन्द्रीय - संस्कृतविद्यापीठे दीक्षान्तभाषणं कुर्वाणैः केन्द्रशिक्षामन्त्रिभिः श्री वि. के. आर्. वि. राव्-महाशयैः 'तुरीययोजनायां संस्कृतरक्षाभिवृद्धिप्रचारार्थं केन्द्राधिकारिभिः २.२५ कोटिमितानि रूप्यकाणि निर्दिष्टानि' इति निवेद्य, संस्कृताभ्युदयिकाः कार्यविशेषा निर्दिष्टाः । "संस्कृतं न केवलं प्राचीन-साहित्य-निधानभूता भाषा, किन्तु अद्यापि दैनन्दिनिकवार्ता-व्यवहारार्थं, परस्परसंवादार्थं, नूतनसाहित्यनिर्माणार्थं चोपयुज्यमाना जीवन्ती भाषा इति यदा अस्माभिः तस्याः सांप्रतिकव्यवहारभाषात्वं साध्यते, तदा तस्याः कापि दृढा प्रतिष्ठा संपादिता भवति; तदुद्देशेन च नाटकादिप्रयोगाः, लोकसभादिषु तया व्यवहार इत्यादिकं कर्तव्यमिति, एतादृशफलसिद्धये च के के उपायाः, किं किं कर्तुं शक्यमिति च विचारयितुं संमेलनमपि किमपि घटयितव्यमिति तैः तदानीं यदुक्तं तत्तेषां संस्कृतविषये वर्तमानं प्रेम आविष्करोति ॥

* * *

एतैः तदैव उक्तम् - यथा तिरुप्पतिस्थले देहल्यां च संस्कृतविद्यापीठद्वयं केन्द्रीयाधिकारेण स्थापितम्, एवमेव तत्तत्प्रान्तेषु अन्यान्यपि संस्कृतविद्यापीठानि केन्द्रसाह्येन स्थापयिष्यन्त इति । तथा लोकसभायामन्यत्र च प्रकटितं नचिरात् - यद् जम्बूक्षेत्रे वर्तमानं श्रीरघुनाथमन्दिरपाठशाला-पुस्तकालयात्मिका संस्था, प्रयागक्षेत्रे वर्तमाना श्री ग. झा विमर्शसंस्था, पुरीक्षेत्रे प्रवर्तमाना पाठशाला च केन्द्रीयविद्यापीठत्वेन निर्धारिता इति । एवमन्यत्रापि मुख्यभूतेषु स्थलेषु संस्कृतसेवां कुर्वाणा एतादृश्यः-अथवा इतोऽपि प्रधानतराः पुराणतराश्च-याः संस्कृतसंस्था वर्तन्ते तेऽपि केन्द्रीय-निर्वाहार्थं स्वीकरिष्यन्त इति विश्वसिमः । कलकत्ता-मद्रास्-इत्यादिराजधानीष्वपि वर्तमानाः संस्कृतसंस्था ईदृशं साह्यमर्हन्ति; यथा प्रतिराज्यमेकं केन्द्रीय-संस्कृतविद्यापीठं भवेत् तथा संविधा अविलम्बेन शिक्षामन्त्रालयेन कर्तव्या । विशिष्य मद्रास्-प्रदेशे संस्कृतविद्या शासकानुग्रहवैधुर्येण शोचनीयायां दशायां

वर्तते । शीघ्रमेव केन्द्राधिकारिभिः अत्र प्रतीकारो न क्रियते चेत् तदा महती विनष्टिः स्यात् । 'गतोदके सेतुबन्धो न कल्याणि विधीयते' इति वाल्मीकिवचनं स्मर्तव्यं भवति ॥

* * *

या केन्द्रीयसमितिः देहलीशिक्षामन्त्रालयाङ्गभूता एतावत्कालं संस्कृतपरिपोषणार्थं व्याप्रियमाणा आसीत् तया यद्यपि बहूनि कार्याणि साधितानि, तथापि केषुचित्कार्येषु तस्या मार्गो विघ्नविहत आसीत् । राज्यसंविधानानुसारं विद्या प्रान्तीयविषयपट्टिकायां वर्तते, न तु केन्द्रीय-पट्टिकायाम् । यत् देहल्यां कर्तुमिष्यते, तत्र तत्तत्प्रान्तीयराज्याधिकारिणां सह-योगोऽवश्यमपेक्ष्यते । प्रान्तीयराज्यद्वारैव संस्कृतशिक्षाविषये तत्तत् कर्तव्यमासीत्, आस्ते, भविष्यति च । एतावत्कालं प्रान्तीयराज्यसहयोगः संस्कृतकार्येषु दुःसंपाद एवासीत् । एतदर्थं च केन्द्रीयसंस्कृतपरिषद् या पूर्वं परिमितसंख्यकैः सदस्यैः संघटिता आसीत्, सा अधुना लोकराज्यसभासदस्यानां तथा प्रान्तीयराज्यविद्यामन्त्र्याद्यधिकारिणां च तत्र अङ्गतया नियोज्य विस्तारिता । अस्याश्च पृथुलीकृतायाः परिषदः प्रथमाधिवेशनं नचिराद् देहल्यां शिक्षा-मन्त्रिणामाध्यक्ष्ये अभूत् । तस्मिन् प्रथमाधिवेशने ऊरीकृता मुख्या निर्णयाः—

(१) यथासम्भवं प्रतिराज्यमेका केन्द्रभूता केन्द्रीयसाह्यावष्टम्भा संस्कृतसंस्था स्थापयितव्या ।

(२) संस्कृतस्य सुबोधतया सर्वजनग्राह्यतया प्रचारार्थं कापि विदुषाम् अनुशीलनसभा आयोजनीया ।

(३) भाषात्रययोजनायां संस्कृताध्ययनस्य स्थानं सम्पादयितव्यम् ।

(४) वेदपाठपरिरक्षणार्थं सर्वप्रदेशव्यापिनी कापि उत्साहदानपरिपाटी आदरणीया ।

(५) लोकराज्यसभयोः संस्कृतज्ञैः सदस्यैः यथासम्भवं संस्कृतभाषया भाषणानि कार्याणि ।

(६) 'विश्व - संस्कृत - संमेलनम्' महत् किमपि १९७२-वर्षे आयोजनीयं, यत्र विदेशादपि संस्कृतज्ञाः तद्भाषानुरक्ताश्च समेष्यन्ति ।

अस्यां नवतया निर्वर्तितायां परिषदि पञ्चषा संस्कृतविद्वांसोऽपि अन्तर्भूताः । द्रव्यदानादिकार्यार्थमुपसमितयः काश्चन नियोजयिष्यन्ते । संस्कृत-विदुषामासु उपसमितिषु स्थानं स्यात्, तेषामनुभवपूर्वा अभिप्रायाश्च शिक्षाधिकारिभिः श्रोष्यन्त इति विश्वसिमः । नूतनसंविधानानुसारं सर्वं कार्यं प्रायः शिक्षामन्त्रालयाधिकारिणां हस्त एव स्यात् । तथापि विदुषामान्येषां च संस्कृतसंस्थानिर्वाहकादीनां चैतस्मिन् द्रव्यसाह्यप्रदानादौ कार्यक्रमे यद्यद् वक्तव्यं वर्तते, तत्र अवधानमधिकारिभिः प्रदर्शयिष्यत इति विश्वसिमः ।

भूतपूर्वया केन्द्रीयसंस्कृतसमित्या स्वप्रतिष्ठापनात् प्रभृति बहुविचारपूर्वकं संस्कृतस्य बहुमुखमभिवृद्धये यादृश्य उपकारवितरणसरणयः कार्यक्रमाश्च निर्धारिताः, एतावत्कालं फलवत्तया प्राचलन्, तेषु ह्रासो विपर्यासो वा भूयसा न करिष्यते नूतनपरिषदा स्वकार्यपरिपाट्या चेति विश्वसिमः ।

* * *

उज्जयिन्यां विक्रमविश्वविद्यालये भोजराजं तत्कृतीश्चाधिकृत्य अनुशीलनसभा आयोजिता, या सं. प्रतिभासम्पादकैः भोजदेवकृतशृङ्गार-प्रकाशमधिकृत्य विशिष्टं विमर्शकार्यं कृतवद्भिरुद्घाटिता । तत्र नानाविश्व-विद्यालयेभ्यश्च विज्ञाः सन्निहिताः, भोजदेवेन स्वग्रन्थैरुद्योतितानि नानाशास्त्राणि तत्र भोजदेवोल्लिखितान् विषयविशेषांश्चाधिकृत्य व्याख्यानान्यकुर्वन् । भोजदेवशासनान्तर्भूतप्रदेशे विराजमानो यो विक्रमविश्वविद्यालयः, तस्य भोजकृतसंस्कृतसाहित्यस्य अनुशीलनमत्यन्तमौचित्यमावहति । आशास्महे

भोजीयसाहित्योद्धाररूपे कार्ये या श्रद्धा आविष्कृता सा स्थिरा फलोदर्का च भूत्वा महाराजनाम्ना कोशागारेषु मातृकासु अद्यावधि अमुद्रिततया दृश्यमाना ये ग्रन्थाः तेषां प्रकाशने अनुस्यूततया विक्रमविश्वविद्यालयं चोदयिष्यतीति ।

* * *

संस्कृतभाषा तत्साहित्यं तन्निष्ठां संस्कृतिं, तथा इस्लामीयसंस्कृतिं च अनुशीलयितुं प्रचारयितुं च द्वे संस्थे अथवा द्विशाखाम् एकां संस्थां स्थापयितुं विश्वविद्यालयद्रव्यसाह्यकार्ययोगेन (U. G. C.) निर्णयः स्वीकृतः । अयमप्यध्यवसायः शोभनः शीघ्रमेव फलावसायी स्यादिति मनोरथोऽस्माकं मानसोल्लासकरो वर्तते ॥

* * *

महाराष्ट्रे संस्कृतं सुप्रतिष्ठितमिति प्रायो विश्वत्र अभिप्रायः । परन्तु गते फेब्रुवरि-मासे तत्प्रदेशशासकैः यत् शिक्षापत्रं प्रकाशितं, तत्र विद्यालयेषु संस्कृतशिक्षणस्य स्थानं न निर्दिष्टमिति महान् विषादः । शिक्षाधिकारिभिः कृतमिमं संस्कृतपरित्यागमन्तरा संस्कृतज्ञरसिकगोष्ठीषु प्रबला विमतिर्वर्तते । मे-मासे इमं संस्कृतोत्पातं विचारयितुं नागपुरे बह्वीभिस्संस्कृतसमितिभिः मिलित्वा किंकर्तव्यताप्रकार आलोचितः । अधिकारिभिरासूत्रितां संस्कृत-त्रुटिं समाधातुं संस्कृतश्रद्धालुभिः सफलो व्यवसायः स्वीकरिष्यत इति विश्वसिमः ॥

* * *

एप्रिल्-मासस्य प्रथमसप्ताहे वाराणस्यां कविभारतीनाम्न्याः नूतन-संस्कृत-कविता-प्रोत्साहकसमित्या वार्षिकोत्सवः समपद्यत । नूतनसंस्कृत-साहित्यनिर्माणस्य आवश्यकतां प्रति तदर्थमेव प्रकाश्यमानायामस्यां संस्कृत-प्रतिभायां मुहुरस्माभिर्नैर्भर्येण लिखितम् । कविभारत्युत्सवस्य आध्यक्ष्यं पाटलीपुत्रराज्यनिर्वाहकाङ्गभूतैः ऐ. सि. एस्- गोष्ठीगरिष्ठैः श्रीधरवासुदेव-

सोहनीमहाशयैरूढम् । संस्कृतविद्वैः तद्भाषायां परमनुरक्तैस्तैस्संस्कृताभिवृद्धये एते कार्यक्रमाः सूचिताः—

(क) भारतसङ्घीयराज्येषु संस्कृतस्याध्ययनाध्यापनं माध्यमिककक्षा-पर्यन्तं वैधानिकरीत्या अनिवार्यं कर्तव्यम् ।

(ख) राजकीयसेवासु अर्धराजकीयसेवासु च संस्कृतोपाधिधारिणां कृते सुरक्षितोंऽशो निर्धारणीयः ।

(ग) समानयोग्यताकेषु समानकार्यकर्तृषु संस्कृतज्ञत्वात् वेतन-विभेदनीतिः शीघ्रमपसारणीया ।

(घ) यत्र यत्र राजपत्रितपदेषु राजदूतपदेषु वा नियुक्तिर्भवेत् तत्र तत्र संस्कृतस्य कार्यकारिज्ञानं योग्यतया अपरिहार्यरूपेण निर्धारणीयम् ।

(ङ) सर्वत्रापि राज्यसेवासु नियोगकाले संस्कृतज्ञानां कृते विशेषो विधेयः ।

(च) संस्कृतशिक्षणसंस्थानां द्रढीकरणमावश्यकम् ।

(छ) संस्कृत-शिक्षा-पद्धतौ तादृशानां विषयाणां समावेशो विधातव्यो यैः संस्कृतस्नातका बहुमुखप्रतिभासम्पन्ना भूत्वा सर्वत्रापि कार्यक्षेत्रे दक्षतया कार्यं सम्पादयितुं समर्था भवेयुः ।

(ज) संस्कृताध्येतॄणां छात्राणां कृते छात्रवृत्तिव्यवस्था, पुरस्कारप्रो-त्साहन-व्यवस्था च पर्याप्तरूपेण विधातव्या ।

(झ) ये हि प्राचीनाः संस्कृत-विद्वांसः कवयश्च जीविकाविहीनाः सन्ति तेषां वृत्तेः प्रबन्धः केन्द्रीयशासनेन कर्तव्यः ।

(ञ) ये लेखकाः कवयो वा नूतना रचना विदधति तासां रचनानां प्रकाशनस्य विक्रयस्य च व्यवस्था कार्या ।

(ट) अनेके हस्तलिखितग्रन्थाः तालपत्र-भूर्जपत्र-लिखितग्रन्था वा प्राचीनानां पण्डितानां सद्मसु कीटादिभोज्यतां भजन्ते । तेषां संग्रहस्य मुद्रणस्य प्रकाशनस्य च व्यवस्था विधातव्या । नूतनानां संस्कृतकाव्यनिर्माण-कर्मठानां रचनानां प्रकाशनं तेभ्यस्तेभ्यः संमानदानं च विधातव्यम् ।

* * *

मार्च्-मास-मध्ये मद्रपुर्यां पश्चिममाम्बल-प्रदेशे श्रीशङ्करमठे अखिल-भारत-संस्कृतभाषा-समित्या वार्षिकमधिवेशनं पण्डितराज बे. सुब्रह्मण्यशास्त्रिणां तथा सं. प्रतिभासम्पादकानां च आध्यक्ष्ये सम्पन्नम् । बहवः पण्डिताः मद्रनगरस्थिता नगरान्तरेभ्यश्च आगताः । प्रातः सर्वान् वेदानधिकृत्य संक्षिप्तानि व्याख्यानान्यासन्; अपराह्णे शास्त्राण्यधिकृत्य । व्याकरण-अलङ्कार-शास्त्रयोः प्रक्रिया, मर्यादा तयोराध्यात्मिकशास्त्रानुबन्धश्च सं. प्र. सम्पादकै-रुपन्यस्ताः । कवितागोष्ठी च विशिष्टांशतया अस्मिन्नुत्सवेऽन्तर्भाविता, यस्यां संस्कृतकवयोऽनेके देहली-महाराष्ट्र-मध्यप्रदेश-वारणस्यादिविदूरप्रदेशेभ्योऽपि स्व-साहित्यबन्धान् प्रैषयन् । अवसरे चास्मिन् समवेतया पण्डितमण्डल्या सं. प्र. सम्पादकानां संस्कृतसेवां बहुमुखीमभिनन्द्य ते "विद्वत्कवीन्द्रः" इति बिरुदेन सम्मानिताः ॥

अन्यापदेशाः

डा० वे. राघवः

१

ग्रीष्मव्योम्नि दिनावसानविगलत्सूर्यांशुकल्माषिताः
पाथोदा रटितस्फुटत्तटवियत्प्रान्ता अटां[1] कुर्वते ।
तान् दृष्ट्वा किमु नीलकण्ठपरिषत् नृत्तोत्कतां विन्दते
नीपः फुल्लति किं ? किमध्वगकुलं चौत्सुक्यतः स्पृश्यते ? ॥

१. पर्यटनम् ।

२

अस्या अस्ति सुसङ्क्रमस्तटभुवि न्यग्रोधशीते स्थले
निश्रेणी च शिलामयी, निवसनप्रक्षालनायोपलः ।
मुद्रा चन्दनभूतिकुङ्कुमयुतो वाटयां जपार्थं मठः
किं वैतैः सकलैश्च कश्चन न चेदन्तस्तटिन्यां रसः ॥

३

क्रन्दस्येव फलैर्यथेष्टमपि रे पुष्टोऽपि निम्बद्रुमैः
क्रन्दस्येव गृहानुपेत्य बत ते प्रेम्णा बलीन् यच्छतः ।
क्रन्दस्येव महत् स्ववाहनपदं देवेन[2] च ग्राहितः
तृप्तः केन भवान् ? कदा नु विरमेत् काक ! त्वदाक्रन्दनम् ? ॥

२. शनैश्चरेण ।

४

मूढो वक्त्रमपावृणोति कलयन् कल्लोलकोलाहलं
व्याप्यैतावदयं कदर्थयति किं भूभागमेवं हतः ।
इत्यन्यो यदमुं च निन्दति, ततः छिन्नं किमम्भोनिधेः
मुञ्चत्वेष कुतो वराकवचसा भावं गभीरोचितम् ॥

५

गम्भीरं यमुपर्यसौ रसधरो[3]ऽनन्ते करोति ध्वनिं
तस्यार्थं कृमिखादसक्तवदनो जानातु काकः कथम् ? ।
श्रुत्वा वापि रटत्यनर्थमयमित्येकेक्षणं वीक्षतां
का वा हानिरितस्तमुत्तरयति स्वोद्यः[4] स कण्ठीरवः ॥

३. रसो जलं, जीवाधारभूतसारश्च । ४. स्वेन सह वक्तुं योग्यः ।

६

अर्चाम्येष सुमैः फलान्युपहराम्यच्छं पयः पीयतां
मन्दैर्गन्धवहैश्च शाद्वलतले विश्रामयाम्येष वः ।
एह्येहीति वनी द्विजैस्तरुशिरोरूढैः समुद्घोषय-
त्येषोऽहं प्रविशामि तां, पथि कुतः कस्त्वं श्वदंष्ट्राभिधः[५] ॥

५. लघुतीक्ष्णः कण्टकविशेषः ।

७

रम्भावृक्ष ! फलैः सुमैरपि दलैः काण्डैस्त्वचा त्वं सदा
नृभ्यो यच्छसि मोदमित्यतितरां प्राशंस्ययं ते गुणः ।
गत्वा जीर्णपलाशलेशगतिमप्यन्यद्रुमाणां फला-
न्यापक्वीकुरुते भवानिति वयं नैतत्प्रशंसास्वलम् ॥

८

हा अब्धे कियतीह विस्तृतिरियं चापः[६] कियत्यो भव-[७]
त्येकस्यापि कणस्य नः शमयितुं शक्तिः तृषं वर्तते ? ।
इत्थं त्वां परिदूषयत्ययि मुहुर्लोकः किमालोकते
योऽभ्रो जीवनदः स जीवनमदो लेभे [८]त्वदेवेत्यसौ ॥

६. च आपः । ७. त्वयि । ८. त्वत्तः ।

९

सत्यं दुस्सह एव घर्मकिरणः, तन्नाम विश्राम्यता-
दासन्ध्यं सुखमत्र मौकलिकुलं छायासु नश्चत्वरे ।
तत्किं दूषयति स्थलानि पिशितैर्निष्ठ्यूतवान्तैरिदं
तच्चाप्यस्तु कुतो नु बुद्बुदयति श्रोत्राणि काकारवैः ? ॥

१०

'मत्तस्सारमशेषमेष निभृतं लब्ध्वोच्चकैरारुह-
न्नेषोऽहं भुवनभ्रजीवनद[९] इत्यास्ते पटाटोपकृत् ।
नैतन्मात्रम् ; इयद्विशाल[१०] भवति[११] क्षाराम्बुधे ! को गुणो
निन्दैवं च ममे'त्ययुक्त इति ते क्षोभो गभीरात्मनः ॥

९. भुवनं बिभर्तीति भुवनभ्रं, तादृशं जीवनं जलं ददातीति ।
१०. इति सम्बुद्धिः । ११. त्वयि ।

११

वृन्ते यान्ति पिपीलिकाः कतिपया रोहावरोहश्रमं
कीटाः केचन मूढमेव च दले स्वापं समातन्वते ।
केऽप्यन्ये शलभा विधूय वदनैस्ताम्यन्ति किञ्जल्ककान्
एकः केवलमेष सून! मधुपो लेढि त्वदीयं मधु ॥

१२

आमोदिप्रसवप्रपञ्चमसृजत् तन्मध्यतस्त्वामिति
त्वामेता न वतंसयन्ति ललना इत्येव वा किं क्षतम् ।
मर्तव्यं किमगन्धिता यदि सखे धुत्तूर! वर्धस्व भोः
आदात्त्वामनु[१२] यः क्षयी शतभिषङ्नाथस्स ते शक्तिवित् ॥

१२. समीपे । क्षयी क्षययुक्तः, क्षयरोगी च ; शतभिषङ्नाथः चन्द्रः शिवशिरःस्थः, वैद्यराजश्च । धुत्तूरस्य शिवशिरोऽर्हतां वैद्योपयोगितां चादायैवमुक्तिः ॥

१३

अज्ञातं च नभःपयोधरकुलान्यापोषयत्यम्बुभिः
बाह्यक्षारतया च रक्षति परं त्यागे रहस्यं भवान् ।
तस्मादेव न केवलं तव चिराद्वर्द्धेन कोऽपि क्षयः
मुक्तासारमपि प्रवालवलयान् ज्येष्ठस्सुराणां[१३] ददौ[१४] ॥

१३. विधाता । १४. पारितोषिकतयेति शेषः ।

१४

स्वः कण्ठो रटतीति किन्नु कुरुतां काकः कठोरस्वनः
तत्पुष्टः पिक एष कूजति कलं नाम्नैव कम्रस्वनः ।
तद्विश्राम्यतु नाम दैष्टिकवचः तत्पूर्वकर्माश्रितं
यत्त्वीर्ष्या पितुरेवमात्मजगुणेष्वेतत्तु घोराद्भुतम् ॥

१५

रोहोऽपष्ठु[१५] परं, छदाः क्रकचवत् कालाभ्रकोलाहले-
ष्वानन्दोत्सवमेषि[१६] किं च चपलासङ्गेषु[१७] संपुष्प्यसि ।
येनैवंगुणकोऽपि केतकितरो ! प्रेयांस्त्वमेकेन[१८] नः
तस्मिन्नप्यथ ते सुमे न भवता निष्कण्टकं भूयते ॥

१५. विकृतं, वक्रम् । १७. विद्युदुद्योते सति पुष्प्यसि ।
१६. वर्षाकाले तव हर्षः । १८. त्वत्पुष्पेन ।

१६

वातान् वर्धयसि प्रकामसुभगानाबीजयस्यप्यमून्[१९]
त्वत्पत्रस्पृश एव यत्र पवना नो तत्र काचिद्रुजा ।
तिक्तोऽसीति परन्तु यद्रसगतं वाच्यं तदुच्चावचं
सारस्ये तव तत्र निम्ब! रसिका वैद्याश्च रुग्णाः परम् ॥

१९. वातान् ।

१७

चूतः कोमलपल्लवैः कलगलान्[२०]नुद्रापयत्युत्कलं
तत् किं नाम विषद्य गच्छतु लयं निम्बः स्वभाग्यान्तरात् ।
प्रीता अस्य फलैररिष्टनिचयाः[२१], नो चेद्विवाहेऽस्त्यसौ
सूतावस्ति, यदत्र नार्चकरुचिस्तच्छक्तिविन्मान्त्रिकः[२२] ॥

२०. कोकिलान् । २१. काककुलानि ।
२२. हस्तस्थ-निम्बदलस्तम्बसञ्चालनैर्हि उच्चाटनादिकर्म मान्त्रिकः करोति ।

१८

आत्मानं कृकवाकुरेष शिखिनं मत्वाल्पबर्हं निजं
प्रोत्क्षिप्याद्य कुनर्तनं वितनुते दृष्ट्वा जनान् पश्यतः ।
तैर्दुर्भाग्यवशात् प्रणाथितपुनर्नृत्तः परावर्तते;
तन्निन्दा नु कुतो? ऽपराध्यति परं तत्प्रार्थनादुर्गतः ॥

१९

सुश्लाघ्यः शिशिरांशुरेष जगतामानन्ददो, वारिधेः
मित्रं कैरवबन्धुरप्यखिलभूनाथोत्तमाङ्गस्थितः ।
कामं दीपयति प्रियं च विलसत्यच्छप्रभो राजते
किन्त्वेके प्रतिरात्रि तस्य मृतये कोकास्तपस्तन्वते ॥

२०

कारुण्यात् स्वयमेव लोकनयनो न प्रार्थितो मानवैः
लोकान् पाति गभस्तिभिः सुखममी जीवन्ति लोकास्ततः ।
मध्ये कश्चिदुदेति कालजलदो; 'भानुस्त्वया रुध्यतां
सिद्धं जन्म तवाथवाम्बुद! महन्! त्वं चापि सृष्टो यतः'[२३] ॥

२३. 'भानुः- यतः' इत्येषा कालजलदं प्रति कव्युक्तिः ।

२१

कश्चिद्धंस इतीर्यते शुचिरुचिर्नालैकवृत्तिर्द्विजो
माकन्दाङ्कुरजातपञ्चमकलः पक्षी पिकाख्योऽपरः ।
तादृक् कोऽपि न वीक्ष्यते खगवरः; किन्त्वद्य सर्वं जगत्
प्रेतक्रव्यपतद्रटत्करटकैराप्लाव्यते केवलम् ॥

२२

व्योम क्रान्तवतः प्रभैकवसते ते पातकालोऽधुना
'रक्षांस्यम्बुदकालभङ्गनिचयाः[२४] क्षुद्रं तमश्चापि यत् ।
मामद्याभिभवन्ति तन्न हि शुचे, किन्त्वेष बालैः[२५] श्रियं
मल्लब्ध्वा[२६] विकलो[२७] निरस्यति पदैः[२८], इत्यस्तु, मा कुप्य भोः ॥

२४. कालमेघशकलाः । २७. शक्तिरहितः, कलाभिर्न्यूनश्च ।
२५. बालश्चन्द्रः । २८. पादैः, किरणैश्च ।
२६. मत्सकाशात् ।

२३

याः[२९] काश्चित् कतिचिद्दिना दशदिनं सिञ्चन्ति, या वा तथा
काश्चित् तन्मुखमानयन्ति सरितश्चापः किमेतद्वशात् ।
लब्ध्वा पूर्तिमसौ[३०]वियज्जलमहासंपद्भिरागाहते
काष्ठाः, स स्वयमप्पतिर्वितनुते स्वोपज्ञकीर्तिश्रियम् ॥

२९. या आपः । ३०. असौ अम्भोनिधिः ।

२४

अन्योन्यं नखरैर्विदारितमगाः पिष्टाश्च भग्ना द्रुमाः
रोदोऽखण्डि किलारवैः,[३१] मधुवनं राज्ञः प्रियं मर्दितम् ।
संज्ञाबोधयिताप्यपाति[३२] धरणौ चञ्चच्चपेटाहतः
किं किं? मर्कटहर्षदर्शनपथे मा भूत् विकल्पस्तव ॥

३१. किलकिलारावैः । ३२. सुग्रीवमातुल आर्यो दधिमुखः ।
सीतां दृष्ट्वा प्रत्यागतानां हनुमत्प्रमुखानां सुग्रीवदर्शनात्प्राक् यत्प्रहर्षावेशाच्चेष्टितं, तदत्र वर्णितम् ॥

२५

यस्मादम्बुदवृष्टमम्बु सकलं योऽन्तेऽखिलायां गतिः
क्षुब्धोर्मिध्वनिरप्यपांपतिरसौ नैव स्वमुद्रातिगः[३३] ।
ये त्वेते तमुपानयन्ति कतिचिद् वृष्टं कदाप्यम्बुदैः
वृद्धयां पश्य कियांस्तटानभि[३४]नदैरेतैः प्रमाथः कृतः ॥

३३. मर्यादोल्लङ्घी । ३४. अभितः ।

२६

मज्जंमज्जमुदित्वरोऽसि यदधोऽधोवारुणीं[३५] शैशवात्[३६]
यच्चापि स्वगुरुप्रियोपगमनं[३७] नैते महापातके[३८] ।
चिन्त्ये चन्द्र ! बहु त्वया ; यदकरोदुच्चैश्च कोऽपीश्वरः[३९]
त्वामेष द्विजराजमप्रतिवचो लोकस्ततो वन्दते ॥

३५. प्रतीचीं दिशं सुरां च । ३८. सुरापान-गुरुतल्पगमनरूपे ।
३६. आ शैशवात् । ३९. प्रभुः, शिवश्च ।
३७. तारासङ्गमः । ४०. चन्द्रं, श्रेष्ठं ब्राह्मणं च ।

२७

कस्तूरीरुरुकृष्णसारहरिणा यास्वाहताः कोटिशः
मत्तेभेन्द्रघटा महीपतिभटैः संगृह्यते यासु च ।
स्वस्थोऽहं मृगयासु तासु तदिदं मद्बुद्धिशक्त्येति मा
त्वामागृह्य नृपाग्रतः शिवे[४१] ! गुणः को वा भटैः कीर्त्यताम् ॥

४१. शृगाल ।

२८

अक्ष्युल्लासनमात्रसंशयवलत्त्रैलोक्यमात्रस्थितिः
किं वासाः स किमालयश्च भगवानाशांशुकोऽगेशयः ।
ये त्वेते तदपाङ्गलोलविभवाः तच्चन्द्रपादाञ्चलो-
ल्लेहा[४२] आरभटीह हन्त कियती चैषां पुनर्नाकिनाम् ॥

४२. चन्द्रस्य सुधाधारत्वात् सुराणां सुधाशनत्वादवमुक्तिः ।

२९

वेलालोलविलासियौवतमितः प्रोत्सारितं सत्वरं
तारावारपरीतचन्द्रविलसद्व्योमापि मष्यन्धितम् ।
मण्डूकोद्रटितानि पङ्क इति कः कीदृक् क्रमः कल्पितः
किं किं नापहृतं त्वयाभ्र ! सुभगं, स्तुत्योऽसि कैश्चित्कृषौ[४३] ॥

४३. कृषिहेतोरिति हेतौ सप्तमी ।

३०

अश्मेत्येव किमस्तु नाम च तथा सामान्यमेकं कुतः
तत्सत्त्वातिविशेषमेव तिरयत्वेनं द्वयोरेतयोः ।
गन्धे चन्दनदारुघृष्ट उपलो मूल्ये च चामीकरो-
द्घृष्टश्चार्हत एककोटिवचनं दुष्टेष्टकाभिः किमु ? ॥

३१

अस्नात्वा न कदापि गेहविशनं लेशोऽपि भोज्यो यदि
प्राप्तो नैव विनाप्तवर्गमशनं व्यापत्स्थिरज्ञातिता[४४] ।
बोधे ब्रह्मगुरुश्च[४५] काक! चरितैरापूतलोको[४६] भवान्
[४७]स्वैरस्तोत्रकवेस्तु निन्द्य इति वां किं जन्मवैरं तथा ॥

४४. एकः काको मृतो यदि बहवः काका मिलित्वा रटन्ति ।

४५. सूर्योदयात्प्रागेव बुध्यमानोऽयं ब्राह्ममुहूर्तबोधोचितस्य ब्राह्मणस्यापि गुरुः ।

४६. श्लेष्म-मृतजन्तुमांसादि स्वयं भुक्त्वा भुवस्तलस्य शोधकः ।

४७. स्वेच्छया यं कमपि स्तुत्वा महीकर्तुं शीलं यस्य, तादृशस्य कवेः ।

३२

सर्वाशाः कबलीभवन्तु तमसो द्यौर्यातु निस्सूर्यतां
मूर्च्छत्स्फूर्जथु तर्जयन्तु च घना एतेषु चिन्ता कुतः ।
तापः शाम्यति वल्गति प्रतिनवः पूरो ललन्तेऽभितः
प्रस्निग्धाः कलमाङ्कुरा इति सखे दृष्टिः कुतो नेदृशी ॥

३३

नित्यं चत्वरमत्यजन्त इह ये विष्ठादिभिर्दूषकाः
कर्णं बुद्बुदयन्ति नः स्म रटितैः सङ्क्लेष्वटन्तोऽभितः ।
पिण्डं भूरि समर्प्य तद्बलमनुव्याहृत्य चाटून् बहू-
नाहूतेषु[४८] शिरोऽपि दर्शयति तेष्वेकोऽपि काकेषु न ॥

४८. श्राद्धे पिण्डप्रदाने 'का, का' इति श्राद्धकृत् तत्पत्नी अन्ये च पिण्डभुक्तय काकानाह्वयन्ति, किन्तु प्रायः तत्समये स दुर्लभो भवतीत्यनुभवसिद्ध एष विषयः ।

३४

आरामेषु विलासियौवतसदस्युद्भिन्नमुग्धाङ्कुरा-
स्वादोन्मेषिपिकालिकाकलिकलान् दृष्ट्वा रसालद्रुमान् ।
रोहन् क्षेत्रमलावनावतिखरानुत्कीलयन् कण्टकान्
झिल्लीनुद्रटयन्नयं स मनुते बर्बूर[४९] आम्रं स्वकम्[५०] ॥

४९. कण्टकिद्रुमविशेषः । दृश्यतां भल्लटशतके श्लो० ३५ ॥

५०. तुच्छमात्मनम् ।

३५

अन्योन्यं प्रतिघातमर्दनसमुल्लङ्घद्रुतोद्धावनैः
रे मूढाः कुत एवमङ्ग किमिति स्पर्धा व ऊर्मिव्रजाः ? ।
एतां प्राप्य पयोनिधेस्तटभुवं निर्भर्त्सितानां पदा
फेनोद्गारमियं दशा तु करुणा निर्भेदमेकैव वः ॥

३६

रे रे वन्यमहीरुहाग्रविटपप्रान्ताः! मरुच्चोदिता
अन्योन्यासहनं किमेतदपि कः सङ्घर्ष एवं मिथः ? ।
यस्त्वेतत्स्फुरदग्निरेभिरनिलैः स्फारीकृतो घस्मरः
निश्शेषं निगिरेत् स वः कुलमहो सर्वं निमेषादिदम् ॥

३७

पारीन्द्रादिवनेशितार उदयन्माहात्म्यगर्वान्धिताः
वक्रं नीतिषु बुद्धिमर्पितवतः क्रोष्टुर्न कश्चिद्रसः ।
काकास्ते गुरवोऽपि पुत्रयशसि स्फारामसूयां दधुः
किं चारण्यमहो जडं ; पिककुलं व्युत्सादमित्यापितम् ॥

३८

आ नेत्रप्रसरान्तमेकमसितं तोयं दृगायासकं
नान्यत्, हन्त न शोभते जलनिधिर्मूढं विनिद्रन्निव ।
उत्क्षिप्तः पवनेन तीरतटमभ्याहन्यमानो बलात्
स्निग्धध्वानमुदारवीचिलसितं व्युत्फेनमाभात्यति ॥

३९

निर्व्याजं निजसद्गुणेरितमना तत्पारिजाताङ्घ्रिपः
भक्त्या साम्बपदार्चनाय सुमनोभारं प्रसूते स्वयम् ।
तन्मध्ये पिशुनोऽयमर्चक इति ख्यातोऽस्ति कश्चिद् विधे
हन्ताहो ! परतोषणे परसुमैर्व्यापद्यतेऽमुष्य किम् ? ॥

४०

धिग्भेकान् धिगिमान् प्रकर्दमपथान् धिग्दुर्दिनान्ध्यं धिगि-
त्येष स्वैरजनः कथं न्वतिखलं त्वां भो नभो[५१] निन्दति ! ।
त्वद्वर्षानुपजीव्य यैर्मधुशरद्ग्रीष्मादिभिः कौसुम-
श्रीभूषैर्विटवद्विनट्यत इमे तारं स्तुता हाः कथम् ! ॥

५१. वर्षाकाल ।

४१

गाम्भीर्ये परिविस्तृतावपि च वा नैवैष बाढं मितः
को जानाति तदीयरत्नविभवानीदृक्तयेयत्तया ।
सोऽयं वारिनिधिश्च तत्र विजने दूरे प्रशान्तः परं
प्रस्तौत्यारभटीं जनांस्त्रिचतुरान् वीक्ष्यात्र वेलाभ्रमान्[५२] ॥

५२. वेलातटे भ्रमतः । प्रायः समुद्रमध्ये स्तिमितता, तटोपान्ते क्षुब्धता च दृश्यते ।

४२

वंशे वस्स दिवस्पतेस्तनुभवैश्चक्रेऽवतारं पुरा
युष्मास्वेव च देववाहनपदे[५४] कश्चिद्दिवि द्योतते ।
श्राद्धे यच्च फलाफलं करुणया तद्वः, तदारट्यतां
काकाः! के कवयोऽत्र पिण्डमुखरा युष्मानिमे निन्दितुम् ॥

५३. जयन्तः ।

५४. शनैश्चरवाहनस्थाने ।

४३

स्निग्धोद्गीथमुदस्तफेनवसनं प्रेमोक्तिवच्छीकरो-
न्मेषं लास्यविकासमेदुरमुदस्तुङ्गा इमा वीचयः
तीरं प्राप्य हता गताश्च विलयं हा हेति मा मा शुचः
तीरे मास्तु कठोरदृग्—यदि न तत्, सर्वे निगीर्णा वयम् ॥

४४

कोऽप्यासीच्चपलो मरुत् स रभसात्तानाविशत्, ते ततो
हेवाकेन मिथो विजृम्भ्य परिमर्द्याक्रन्द्य कोलाहलैः ।
क्षिप्त्वाहत्य वपूंषि दुद्रुवुरहो कस्मात्? कुतः? केवलं
तीरे क्रूरविघट्टिता लयमिता वार्धेरिमा वीचयः ॥

४५

झञ्झाभिः कति सादिताः कति तडिद्वज्रैः प्रदग्धाः कति
स्रोतोजृम्भणवाहिताः ! अलमिमां घोरां दयां संहर ।
तापः शाम्यति सस्यमुद्भवति चेत्यम्भस्त्वदाशंसता
चण्डौदार्यं नभः ! तपस्विजगता स्वात्मापि संशायितः ॥

४६

चित्रं ते प्रथयस्व पत्रमभितो वाटीषु ते विभ्रमै-
श्चेष्टस्वालल हन्त चित्रशलभ! प्राप्तोऽस्यलेर्वैभवम् ।
वर्णस्तस्य तु कृष्ण एव; स परं पुष्पेषुमौर्वी, तथा
तद्गीतिर्जनमादिनी, मधुप इत्याख्यैव का श्रीरहो ॥

४७

धुत्तूरस्य फलं फलं च पनसं व्याप्तं परं कण्टकैः
बर्बूरेषु च रोजिकासु[५५] च तथा स्फीतोत्थिताः कण्टकाः ।
आमस्त्येव विधौ[५६] च लक्ष्म[५७] स परं तेनाधिकं राजते
पश्यामो, यदि लाञ्छिता अपि भवन्त्यर्कादयोऽप्यामृताः[५८] ॥

५५. 'रोस्' इति ख्यातेषु सुमेषु । ५६. चन्द्रे । ५७. कलङ्कः ।

५८. कण्टकिषु फलेषु धुत्तूरपनसयोः, तादृशेषु सुमेषु बर्बूर-रोजयोः व्यतिरेकः । तथा कलङ्कवतश्चन्द्रस्य निष्कलङ्कस्यापि सूर्यस्य व्यतिरेकः । आमृता अमृतमयाः । आह्लादका इति यावत् ॥

४८

भूतानां स पतिः, पतिस्स जगतां निर्वस्त्रमप्यस्थिभिः
धुत्तूरैश्च शवावनावपि नटेत् यद्वाथ तद्वाखिलम् ।
माहात्म्येन हि पर्यवस्यति विभौ; त्वं कः? कृतं चेत्तथा
घर्मं निन्दति, ते ददाति लिकुचं, कारां च शीघ्रं जनः[५९] ॥

५९. ग्रीष्मे बुद्धिप्रकोपः, पित्ताधिक्यं च भवति । लिकुचरसेन शिरसि लेपः पित्तोपशमनार्थः । उन्मत्त इति कारागृहप्रवेशः ॥

४९

सोढा पञ्जररोधमाहृतफलैः सन्तुष्य यैः कैश्चना-
प्येणाक्ष्याः पठिताः कियच्चिरमहो वाचस्त्वया भोः शुक ।
स्वैरं जल्पति यज्जनः—श्रम इयान् व्यर्थस्तवायास्य किं ?
क्रोशत्क्रोष्टुनि काकघूकमुखरे किं ते वने ? निर्व्रज ॥

५०

अन्वागात् परिवार्य यं गजघटा शुण्डाङ्घ्रिभिश्चूर्णयन्
यो बभ्राम वनेषु यूथनृपतिः सोऽयं कथं संप्रति ।
नीतः पत्तनमस्य कीकटपथेष्वादिष्टरेखामनु
प्रस्पन्द्यङ्घ्रि नृकीटकै[६०] र्निगडितः शुण्डेन भो नीयते ॥

६०. तुच्छकीटप्रायैर्नरैः ।

५१

खर्वा यूयमहो कियत्खलु वयं दैर्घ्येण शोभामहे
नालैकाशनदोष एष, न बिसे सारोऽस्ति मत्स्ये यथा ।
धिग् वः पङ्कजचत्वरान्तरनिशं निद्रां, बका यद्वयं
राजानस्सरसां भवाम इयती श्लाघा हि नो वीगणे[६१] ॥

६१. पक्षिसमूहे । इयं हंसान् प्रति बकानामात्मश्लाघाविकत्थनोक्तिः ।

५२

फीट्कारस्स नभोविदारिगरिमा यातः कुतस्साम्प्रतं
शुण्डः किं वनराज्यकालमृतिकृत्[६२] नैवाधिकं स्पन्दते ।
यस्मिन्नुच्चलिते चकम्प पृथिवी सर्वा स एवैष किं
पादः ? मन्दुरनागराज ! किमिदं नीतोऽसि मार्जारताम् ॥

६२. वनराजीनामतर्कितं झटिति ध्वंसकारी शुण्डादण्ड इत्यर्थः ।

५३

भोः कुत्रासि कलस्वनाद्य ?[६३] समुपेह्यद्यैव याचामहेऽ-
[६४]प्याचैत्रं प्रतिपालनं कथमिमे दीनास्सहिष्यामहे ।
चूताङ्कूररसं विना यदि न ते जायेत सा काकली
किञ्चिद्दर्शय मूर्च्छनां, करटका व्याप्य श्रवो घ्नन्ति नः ॥

६३. कलस्वन कोकिल । ६४. आगामिचैत्रपर्यन्तम् ।

५४

यज्ज्ञातिच्छलमात्मपातकरणं यन्मन्दुराबन्धनं
यत्सीदन्ति कपोल एव च मदस्रोतांसि फल्गवध्वसु ।
तत्तन्नाशभिया च मन्दचलनं सर्वं न तन्मे[६५] शुचे
शीर्षाध्यासिनृकीटकाङ्कुशहतिस्त्वाघट्टते मर्मसु ॥

६५. मे गजस्य । गजस्य स्वोक्तिरियम्।

५५

मृगा ऊचुः—

व्याधेभ्यो यदि नैव रक्षसि तदस्त्वस्माकमाक्रन्दितं
भूभृत्कन्दरकुम्भकर्ण![६६] भवता नाश्रावि, तद्युज्यते ।
अस्मानेव निहत्य भक्षयसि चेज्जाग्रद्दशा ते क्षणं
मुञ्चाद्यैव मृगेन्द्र! नो वनमृगान्, तुभ्यं त्रिसन्ध्यं नमः ॥

६६. भूभृत्कन्दरेषु चिरं निद्रामग्न इत्यर्थः ।

५६

सिंहः प्रत्युवाच—

स्वाराज्यं न न वः प्रदेयमपि तच्छिक्षार्थमेवेयती
दीक्षा मे न तु काल एष भविता कालेन पूर्णाहिता ।
भूयो दुर्बलिनः स्थ नाहमिह चेत्स्यामत्र शास्ता क्षणात्
युष्मान् व्याघ्रवृकादयो मृदुमृगान् हत्वा गिलेयुर्ध्रुवम्[६७] ॥

६७. अत्र श्लोकद्वये भूतपूर्व-आङ्ग्लसाम्राज्यसमाधिः ।

५७

काले माधव एव, तत्र च रसालाङ्कूरभुक्त्यैव भोः
तन्वन्त्युत्कलमूर्च्छनाः कलगलास्तेषां व्यवस्थेयती ।
प्रत्यूषे प्रथमं प्रबुध्य पिशिताद्यश्नन्त्यखेदं सदा
कर्णारुन्तुदमुद्रटन्ति - अयि बिधे काकेषु केयं दया ॥

६८. कलगलाः कोकिलाः ।

५८

त्वत्पत्रेष्विह वर्णसंपदयि या सा नैव केकिन्यपि
त्वं देवस्य[६९] जयध्वजः, तव पुरस्ते तारकाद्याः[७०] क्व वा ।
कीर्त्यै कुक्कुट ! किं न्वतः ? तव कृपाधीनं प्रभातं, रविः
भीकम्प्रः समुदेति कुड्यशिखरे पश्यंस्तवोद्ग्रीविकाम् ॥

६९. कार्तिकेयस्य । ७०. तारकशूरपद्मादयोऽसुराः ।

५९

कूटस्थो भगवान् स एव यदि वः का वा वराहाः ! स्तुतिः ?
यद्रूपं निगमा दधुस्तदितरो वन्द्योऽस्ति कः कुक्कुराः ! ।
रामोऽद्याप्यधमर्ण एव भवतां साह्याय भो मर्कटाः !
हन्त प्राणिषु कीर्तिसंपदियती केषां समुत्प्रेक्ष्यताम् ॥

६०

आर्द्रीकृत्य महीमनासनसहां कुत्राप्युपेताध्वना[७१]
यातं तुच्छपयोधराद्य भवता; कस्त्वामिहाहूतवान् ? ।
त्वत्तो नैव कदाप्यपैक्षिषि तपोच्छेदो,[७२] य आसीत्पुरा
वायुः कश्चिदसौ च संप्रति न नः, धिक् ते दयाचेष्टितम् ॥

७१. येन अध्वना अत्र उपेतमागतम्, तेनैव यातमित्यर्थः ।
७२. तपस्य ग्रीष्मस्य उच्छेदः ।

६१

आ रथ्यामलमा महानसबलि त्वत्केकरानीक्षितं
त्वच्चञ्चक्षतमस्ति किं ? किमुदरे बद्धस्त्वया बाडवः ? ।
यत्प्राप्तोऽसि पिपीलिकाबिलमुखाकीर्णोञ्छलेशानिमान्
काकाद्यैव तवेयतीं कृपणतां जानामि भूते भवे[७३] ॥

७३. पूर्वस्मिन् जन्मनि ।

६२

पादं घर्मदहद्रजस्सु पथिषु क्षेप्तुं च नो शक्नुवन्
प्लक्षार्थी पथिको विनिन्द्य शपति त्वां ताल ! शोचामि ते ।
मध्याह्नेषु रवौ तपत्यचलिते वाते गृहे चत्वरे
त्वत्पत्राणि हि तालवृन्तविधया रक्षन्ति, नामी वटाः ॥

६३

श्रुत्वोद्ग्रीवकटुस्वनं तव भियोदेति प्रभुर्ज्योतिषां
दृष्ट्वा केतुपटे द्रुतासुरचमूस्त्वां देवसेनापतेः[७४] ।
तत्स्वैरं चर चत्वरे नट रट, त्वं कुक्कुटः खल्वसि !
त्वां कः किन्नु वदेत्, किमन्यद् ? अभितो मुञ्चाखिलं ते मलम् ॥

७४. कुमारस्य ।

६४

भव्यैर्नामभिराह्वयन्ति सहकार! त्वां रसालं बुधाः
त्वत्पुष्पैः स शरी स्मरः, तव फलैः पक्वैरपक्वैरपि ।
पूर्णं भोजनपात्रम् ; अस्तु, तव किं पत्रैर्विना मङ्गलं
कार्यं किञ्चन, पातितोऽपि कुरुषे गेहादि ते दारुणा[७५] ॥

७५. काष्ठेन ।

६५

'ये वृक्षाः फलवत्तयेह विदिताः स्वाद्याः प्रशस्या जनैः
नाहं तेषु ममावहेलनमपी'त्यास्तां सखे मा शुचः ।
भुक्त्वा तत्तदजीर्णतः श्रमजुषः शय्योपधानाश्रयान्
तांस्त्वत्तूलचयेन लालयसि, ते तुल्योऽस्ति कः शाल्मले ! ॥

६६

किं खाद्यत्वमिहैक एव गणितः श्लाघ्यः फलानां गुणः
त्वद्योगात्कतक ! प्रसीदति जलं किं ते समं स्यात्फलम् ।
भोः कार्पास ! न ते फले यदि गुणाः को वा मृगेभ्यो नृणां
भेदः स्यात्, इह निष्फलं नहि फलं किंचित्प्रपञ्चे प्रभोः ॥

६७

शीतस्वादुरसोऽन्तरस्ति रुचिरं पाकाय वस्तूचितं
पात्रैधःकृतये[७६] च खर्परयुगं[७७], यद्वल्कलं बाह्यतः ।
तस्माद् रज्जुगुणः, किमस्ति तनुरप्यंशस्त्वदीये फले
यो लोकोपकृतिं करोति न, कथं त्वां नारिकेल ! स्तुमः ॥

७६. भाजनत्वेन इन्धनत्वेन च उपयोगः प्रसिद्धः ।

७७. अतिकठिना द्विधा भिन्ना त्वक् ।

६८

सर्वोऽशस्तव नारिकेल ! बहुधा कार्योपयोगी फले
पूर्णं मङ्गलभूषणाय च फलं, मद्यं प्रसूनोच्चयात् ।
पत्रैस्ते छदिरुष्णवृष्टिहृतये, छिन्नोऽपि काण्डैर्गृहे
स्तम्भो वारिणि सङ्क्रमश्च भवसि, त्वं बोधिसत्त्वो द्रुषु ॥

६९

ते ते सन्ति मृगा यदीयमलविण्मूत्रादिकं पावनं
गन्धद्रव्यमथौषधं च, दशनं त्वक् चाप्यनर्घं महत् ।
एके सन्ति यदौधसीयमखिलं भोग्यं च होष्यं विभो-
रन्ये प्रेमकृतज्ञताद्यतिशयाः, हीनं मृगत्वं कथम् ? ॥

७०

या आपः परिपोषयन्ति विततं नाशं वितन्वन्ति ता
ओघीभूय ; य एव पाककृदसावेवानलो दाहकः ।
प्राणात्मैव मरुत् प्रभञ्जनदशामेत्याखिलध्वंसकः
नैकान्तं गुणदोषता ; तदुचितं ग्राह्यं विनैवाग्रहम् ॥

प्रातःपञ्चकम् (दिवःप्रदेशाः)

ब. च. छापोत्कटः

(दि) दिष्टयाहं पुनरेकमद्य दिवसं पश्यामि जीवन्नहो
उद्यन्तं च सहस्ररश्मिममलं भूयोऽभिनन्दाम्यहम् ।
आत्मोद्धारकृते मया भगवतः प्राप्तोऽवकाशः पुनः
कोऽन्यो धन्यतरो मदस्ति धरणौ सोऽहं नमस्यामि तम् ॥

(व) वत्सागच्छ वरं वृणीष्व विहितं कार्यं त्वया वीर्यवत्
तुष्टोऽहं तव कर्मणा मतिमता पापं निराकुर्वता ।
कन्दर्पेण दुरात्मना छलवता व्यामुह्यमानं मनः
पाताद्रक्षितवत्त्वमात्मविभवं तच्छ्लाघनीयं परम् ॥

(प्र) प्रत्येकं पदमस्तु विक्रमघनं निर्जित्वरं सत्वरं
निस्तन्द्रं नितरां प्रमादरहितं सोत्साहमत्यूर्जितम् ।
लक्ष्मीर्येन समुत्सुकेन वरयेन्मामेत्य हृष्टा स्वयं
सोऽहं चापि तया वसेयमजरस्तद्भोगयोग्यश्चिरम् ॥

(दे) देहान्तात्प्रथमं महत्किमपि तत्कार्यं विदध्यामहं
येन ख्यातिमहं लभेय विपुलां धर्मार्थकामैः समम् ।
दिष्टया सर्वमनामयं मम वपुर्बुद्धिश्च शुद्धास्ति मे
शक्तिः शक्तिधरस्य चातिकृपया मय्यस्त्यलं निश्चितम् ॥

(श) शक्तिं शक्तिधरो ददातु भगवान् मह्यं कुमारः परां
सर्वेष्वेव यथा लभेय विजयं सङ्कल्पितं कर्मसु ।
निर्भीकश्च निरामयश्च नितरामानन्दितेनात्मना
सर्वेषां हितमाचरेयमवनावानन्दमेवोद्गिरन् ॥

विरहगीतिः

प्रियव्रतशर्मा

न मर्मच्छिदं मे व्यथां वक्तुमीयात् ।
पथा चाप्यनन्तेन गच्छेत् कथेयम् ॥

१

चिरात् सञ्चितां घोरचित्तश्मशाने
सुदन्दह्यमानां चितावद् दुरन्ताम् ।
परं स्तब्धवेलासु खेलन् सलीलं
न जागर्ति रात्रौ च कापालिको यः ॥

मदीयां व्यथामालिकां वर्णयेत् कः ।
अरण्या यथा पूर्न कथ्या कथयेम् ॥

२

उषेयं कपोले दधानाऽनुरागं
सरागा च सन्ध्या सलज्जानुभावा ।
अहो दैवयोगो न योगस्तथापि
रजन्या दिनेशो न दृष्टः कदाचित् ॥

कविः को हि वक्तुं क्षमो विप्रलम्भं
निरन्तो वियोगो दुरन्ता कथेयम् ।

३

सरित् कुत्र याति त्वरासंयुतेयम्
रसाप्लाविता चार्पिता वै समग्रम् ।
समाबाधिता चापि पाषाणखण्डैः
पतत्यम्बुधौ लीयते निःस्वभावा ॥

इयं प्रेमगाथा सनाथेव भाति ।
प्रगीता च लोके सुनीता कथेयम् ॥

४

समानान्तरं सर्वदा सन्निधौ मे
समायाति नित्यं यथा रेलवीथिः[1] ।
परं योगभावो न भावी कदाचित्
सुखं स्वप्नमात्रं चिरं दुःखयात्रा ॥

कथंकारमाराधनीयो जनोऽसौ
कथं तत्र गच्छेत् मदीया कथेयम् ॥

५

सुविख्यातकाठिन्यपाषाणखण्डः
द्रुतं पर्वतेषु प्रयाति द्रवत्वम् ।
स्फुटत्वं व्रजेद्दीर्यमाणः प्रवाहो
समेषां मनो हर्षयन् निर्झरस्य ॥

परं चित्रमेतत् न ते सौमनस्यं
भजेन्न द्रुतं स्यात् विचित्रा कथेयम् ॥

---

१. The Rails.

प्रवर्ततां भारतभाग्यचक्रम्

विघ्नेश्वरशर्मा

महर्षिभिः कण्ववसिष्ठमुख्यैः अकृत्रिमैर्नैगमवाक्यवृन्दैः ।
उर्व्यां मुहुर्दर्शितसत्यमार्गे प्रवर्ततां भारतभाग्यचक्रम् ॥ १ ॥

एकोऽथ वा स्युर्बहवोऽत्र देवाः उपास्यमाना भुवि मङ्गलाय ।
न तत्र दोषो विविधो हि मार्गः प्रवर्ततां भारतभाग्यचक्रम् ॥ २ ॥

सत्ताऽस्मदीया ननु सार्वभौमा जलेऽन्तरिक्षे भुवि च प्रकल्प्ता ।
यथा भवेद्वैरिभटैरलङ्घ्या प्रवर्ततां भारतभाग्यचक्रम् ॥ ३ ॥

ते यन्त्रशास्त्रे नितरां प्रवीणाः गोलान्तरे प्रप्रथमावताराः ।
अत्रोद्भवाः साहसिका यथा स्युः प्रवर्ततां भारतभाग्यचक्रम् ॥ ४ ॥

मा कश्चिदास्तामबलोऽथ भीरुः शास्त्रानभिज्ञो नयवर्जितश्च ।
मा नाम शोच्या हि मनोः प्रसूतिः प्रवर्ततां भारतभाग्यचक्रम् ॥ ५ ॥

मर्मच्छिदास्ते विकटः करालो मतीयभेदः परितोऽद्य राष्ट्रे ।
सत्संविधानेन विधूय दोषं प्रवर्ततां भारतभाग्यचक्रम् ॥ ६ ॥

दोग्ध्रयश्च गावः सुजनाः प्रहृष्टाः हरित्सवर्णा पृथिवी ससस्या ।
पुष्टिं समृद्धिं बिभृयाद्यथेयं प्रवर्ततां भारतभाग्यचक्रम् ॥ ७ ॥

वाल्मीकिकक्ष्या ननु ये कवीन्द्राः वागाम्भृणीतुल्यगुणाः स्त्रियश्च ।
तेषां च तासां चिरसन्निधानात् प्रवर्ततां भारतभाग्यचक्रम् ॥ ८ ॥

प्रनष्टवैरं कृतसत्प्रचारं खण्डान्तरे योजितरायभारम् ।
गृहीतसाचिव्यमनन्तसत्त्वैः प्रवर्ततां भारतभाग्यचक्रम् ॥ ९ ॥

अन्योन्यसौहार्दमुपात्तविद्यम् अहीनसौजन्यमपारवीर्यम् ।
सन्तानमत्रत्यमरोगमारात् प्रवर्ततां भारतभाग्यचक्रम् ॥ १० ॥

सदैव मैत्र्यै स्पृहयेयुरन्ये यदीयसन्तानगुणानुरक्ताः ।
वीरप्रसूर्भारतभूर्यथा स्यात् प्रवर्ततां भारतभाग्यचक्रम् ॥ ११ ॥

ये शोषिताः शोषणतत्परा ये यथार्हसंभागमुपेयिवांसः ।
वित्तेषु ते ते भृतसौमनस्याः प्रवर्ततां भारतभाग्यचक्रम् ॥ १२ ॥

मा भूदराष्ट्रीयमनःप्रवृत्तिः हिन्दुर्यथा वाथ महम्मदीयः ।
तथा यहूद्योऽपि च पारसीकः प्रवर्ततां भारतभाग्यचक्रम् ॥ १३ ॥

परस्परासूयविवृद्धवैराः क्षतिं समन्तादुपपादयन्तः ।
देशे तु धिक् तान् दमनेन तेषां प्रवर्ततां भारतभग्यचक्रम् ॥ १४ ॥

अद्वैतशास्त्रं विवृतात्मभावं द्वैतं च संदानितवासुदेवम् ।
विशिष्टमप्याकलयेत् यथा शं प्रवर्ततां भारतभाग्यचक्रम् ॥ १५ ॥

राष्ट्रं स्वयं पूर्णमनन्यतन्त्रम उत्पादितान्नं बहुलोहकं च ।
महाजनैरुद्यमिभिर्यथा स्यात् प्रवर्ततां भारतभाग्यचक्रम् ॥ १६ ॥

सीमाविवादोऽन्तमुपैतु विज्ञैः मुहुः समासादितसामरस्यः ।
प्रवृद्धसख्याश्च जना यथा स्युः प्रवर्ततां भारतभाग्यचक्रम् ॥ १७ ॥

विद्रोहिणो ये निजजन्मभूमेः स्वार्थैकलक्ष्याः कपटानुवृत्ताः ।
निपात्य तान् द्राग् विफलाभियोगान् प्रवर्ततां भारतभाग्यचक्रम् ॥ १८ ॥

दोःशालिनां यत्प्रकृतं बुधानां यच्छोभनं कर्षकसङ्कुलस्य ।
यत्सांप्रतं तत्र नियोज्य तांस्तान् प्रवर्ततां भारतभाग्यचक्रम ॥ १९ ॥

विमाननां वीतधना विदग्धा मा नाम ते प्राप्नुयुरत्र राष्ट्रे ।
क्षुद्रैः प्रमत्तैरधिकारयोगात् प्रवर्ततां भारतभाग्यचक्रम् ॥ २० ॥

पुष्णाति सर्वत्र समानभावं विश्वात्मना यत्र चकास्ति भूयः ।
जागर्तु सा संस्कृतिरस्मदीया प्रवर्ततां भारतभाग्यचक्रम् ॥ २१ ॥

विद्वेष एवार्थवतीतरेषां लज्जावहा धर्मरतिः किलास्ते ।
स्नेहे यथा सम्प्रति पर्यवस्येत् प्रवर्ततां भारतभाग्यचक्रम् ॥ २२ ॥

संसत्सु हृद्या विततिः कवीनां जीयात् मधुस्यन्दिवचोविभावा ।
यत्साहचर्येण मनःप्रतुष्टिः प्रवर्ततां भारतभाग्यचक्रम् ॥ २३ ॥

विघ्नेशवक्त्राब्जविनिःसृताभिः पीयूषसाधर्म्यवतीभिराभिः ।
वाग्भिः प्रकृष्टार्थसुगुम्फिताभिः प्रवर्ततां भारतभाग्यचक्रम् ॥ २४ ॥

राधायाः पत्रं कृष्णं प्रति

रामचन्द्रमिश्रः

माधव, त्वमसि दूरदेशगो
नाभिधातुमलमस्मि किञ्चन ।
त्वां स्वयं, तदिह पत्रपद्यया
सूचयामि मनसा विवक्षितम् ॥ १ ॥

त्वं ममासि हृदयं तदाशयं
मामकं समधिगन्तुमीशिषे ।
अन्तरापि दलमात्मशान्तये
किन्त्वयं मम समः समुद्यमः ॥ २ ॥

को नु नेष्यति दलं त्वदन्तिके
मामकं तदपि न व्यभावयम् ।
अद्य वा क्वचन वासरान्तरे
कोऽपि चिन्न मम किं दयिष्यते ॥ ३ ॥

नन्दनन्दन, भवद्गुणावली-
कृष्टमानसतया त्वदन्तिकम् ।
यातया मयकया निजास्तिता
सर्वथा त्वयि निलायिताऽभवत् ॥ ४ ॥

त्वं सुखीति सुखिनी, त्वदादरे
स्वादरप्रणयिनी, त्वयार्थिनी ।
त्वन्मयी बहिरथान्तरे चिरं
कामनाशबलिता स्थिताऽस्म्यहम् ॥ ५ ॥

बन्धुमुद्धुरधिया त्वयि स्वकं
मानसं चपलमस्मि सन्ततम् ।
त्वद्गुणान् विमृशती दृढोर्जितान्
प्राकृतानपि न तादृशानिव ॥ ६ ॥

मायया न मदनस्य नापि वा
केनचित्परतरेण वस्तुना ।
किन्तु केवलमहं तवाभवं
मञ्जुना स्मितलवेन हारिणा ॥ ७ ॥

लोक एष परदेशमृच्छति
स्वं विधेयमुपलक्ष्य तत्र वा ।
वत्सरान्वसति किन्तु कोऽपिचि-
न्न च्छिनत्ति सहसैव बन्धनम् ॥ ८ ॥

यास्यताऽपि दयितेन किं प्रिया
नोच्यते किमपि वा न सूच्यते ।
त्वं त्वसूचितगतिर्गतो द्रुतं
दूरदेशमिति किं तवोचितम् ॥ ९ ॥

नाहमस्मि तव वल्लभा यत-
स्त्वद्वियोगमपि सोढुमीश्वरी ।
प्रेयसोऽपि तव भावबन्धना-
न्मोचितापि चिरजीविनी सती ॥ १० ॥

तावके हृदि कुतस्तरामभू-
दीदृशी ममतया विवर्जिता ।
भावना यदसि नायिकान्तर-
प्रेमपाशवशगोऽपि निर्वृतः ॥ ११ ॥

यामुनं तटमिता त्वदङ्गगा
किं कदापि तव मानसे स्थिताम् ।
वञ्चनाविषधरीं व्यभावयं
हा यया कुटिलयाऽस्मि दंशिता ॥ १२ ॥

बान्धवी तव, सखी तव, प्रिया
तावकी, तव न काऽभवं पुरा ।
साम्प्रतं तव न कापि सैव वा
वर्त एष विषयो विधिक्रमः ॥ १३ ॥

त्वद्व्रतप्रणयमात्रजीवितां
त्वन्मयं जगदिदं समाश्रिताम् ।
तावकीं सुरतदासिकामिमां
त्वां छलेन जहतं जगद्धसेत् ॥ १४ ॥

श्रूयते त्वमसि राजकार्यकृ-
त्तत्त्वयि स्थितिरियं निवेद्यते ।
वञ्च्यते यदि निजाश्रितो जनो
वञ्चकः किमु न दण्डमर्हति ? ॥ १५ ॥

त्वं विहाय यदुनाथ गोकुलं
कुत्रचिच्चिरनिवासमेष्यसि ।
कल्पनामपि न जातु जग्मुषी
कृष्ण, ते स्थितिरभूदपीदृशी ॥ १६ ॥

मानमापिषि पुरा त्वयाऽसकृ-
न्मानमेत्य बहुभिः प्ररोचनैः ।
साम्प्रतं स्मरणमेत्य मामकं
तन्निकृन्तति मनोऽतिनिर्ममम् ॥ १७ ॥

नाथ, नाथितवती पुराऽभवं
त्वां प्रसन्नमहमेकदा वरम् ।
मां न हातुमधुना त्वया निजा
स्वीकृतिर्विफलतां किमाप्यते ? ॥ १८ ॥

लोकनाथ, चिरकालदासिका
राधिका चरममेकमिच्छति ।
दूरदेशवसतिर्भवन्नपि
स्वेषु मां गणयितुं दयिष्यते ॥ १९ ॥

वाञ्छसि बन्धो प्रेम यदि त्वम्*

हरिश्चन्द्रः रेणापुरकरः

स्वार्थविचारं भोगविलासं
केवलमात्रं स्वात्मरतित्वम् ।
मानव! नूनं वर्जय नित्यं
वाञ्छसि सत्यं प्रेम यदि त्वम् ॥ १ ॥

त्यागतपोभ्यां शोधय बन्धो!
जीवनमार्गादर्शतलं त्वम् ।
चञ्चलचित्तं स्थापय गाढं
वञ्छसि नूनं प्रेम यदि त्वम् ॥ २ ॥

नश्वरविश्वं गत्वरदेहं
पार्थिवभोगासक्तिविचारम् ।
चिन्तय मा त्वं जीवनसारं
वाञ्छसि बन्धो! प्रेम यदि त्वम् ॥ ३ ॥

त्यागविशिष्टं भोगविहीनं
वीक्ष्य सुसूक्ष्मं सृष्टिविधानम् ।
आचर तादृशमेव हि बन्धो!
वाञ्छसि सत्यं प्रेम यदि त्वम् ॥ ४ ॥

विश्वविधातुः सर्वहरित्सु
व्याप्तवितानेत्यागकृशानौ ।
स्वात्महविस्त्वं ह्यर्पय बन्धो!
वाञ्छसि नूनं प्रेम यदि त्वम् ॥ ५ ॥

उज्ज्वलदिव्यं भव्यविशालं
निर्जरनित्यं पुण्यपवित्रम् ।
प्रेम न लभ्यं पार्थिवचित्तैः
चञ्चलवृत्तैर्भृङ्गचरित्रैः ॥ ६ ॥

---

* वृत्तं—चम्पकमाला

आत्मयुगस्याद्वैतविरूढं
भावनिगूढं चान्तरगूढम् ।
द्वन्द्वविहीनं सन्ततसान्द्रं
यन्मिलनं तत्प्रेमपदाख्यम् ॥ ७ ॥

सिन्धुतरङ्गे निर्झरनीरे
वायुविहारे पक्षिविरावे ।
मर्मरशब्दे मेघनिनादे
त्वं शृणु बन्धो! सुस्वरगीतम् ॥ ८ ॥

"प्रेम कुरुध्वं प्रेम कुरुध्वं
प्राणिन" इत्थं गायति नित्यम् ।
स्थावरजीवः स्निग्धनिसर्गो
रे! कुरु कर्णे मानव! मूढ! ॥ ९ ॥

कोमलचण्डौ चन्द्रपतङ्गौ
शीतलतिग्मौ वारिकृशानू ।
पश्यत कीदृग् ह्याचरतस्तौ
वत्सलवृत्त्या सत्यपि भेदे ॥ १० ॥

निर्झरनद्यः सिन्धुतटिन्याः
भूमिमयूखाः सानुसमीराः ।
पश्य मिलन्ति प्रेमनिबद्धाः
सृष्टिविधातुः पद्धतिरेषा ॥ ११ ॥

देवदुरापं मानवदेहं
प्राप्य न मर्त्यः सुखितो जातः ।
विस्मृतिगर्ते तेन क्षिप्तं
विश्वविधातुः सृष्टिविधानम् ॥ १२ ॥

कालः क्रीडति

एम्. एन्. जोशी

भूलोकाख्यमिदं प्रविश्य विपिनं मायाश्वमारूढवान्
भ्रूभङ्गप्रकटाट्टहासविकटो ह्याखेटबद्धस्पृहः ।
मुक्त्वाऽग्रे खलु विश्वकद्रुनिवहं यक्ष्मादिरोगादिकं
कालव्याध इहैव सञ्चरति भोः जन्तून् विहन्तुं सदा ॥ १ ॥

घोरे पारविवर्जिते विसृमरे संसाररूपाम्बुधौ
मायाजालमुपेत्य धीवरवरः कालाभिधः कामगः ।
मत्स्यान् स्थूललघून् समान् प्रधरति क्षिप्त्वा स दीर्घं करं
जाले यस्य पतन्त्यनुक्षणमहो मत्स्याः परं कोटिशः ॥ २ ॥

दृष्ट्वेमं मनुजाः प्रजाग्रत वृकं कालाख्यमत्यद्भुतं
दंष्ट्रात्युग्रमुखाद्धि गृध्नुरसनां नित्यं प्रसार्य स्थितम् ।
अत्तुं वाञ्छति मर्त्यमेषसमजं लब्ध्वाऽवकाशं मुहुः
तत्तूर्णं शरणं कुरुध्वमयि भोस्तं मेषपालं प्रति ॥ ३ ॥

छाया सान्द्रतमास्ति यत्र सततं श्रान्ताः प्रमोदामहे
मत्वैवं न कदापि तिष्ठत नरा निर्भीततामाश्रिताः ।
छायेयं न तरोरिहास्ति पतिता कस्यापि तापापहा
विश्वग्रासपरायणस्य तु फणा सा कालसर्पस्य या ॥ ४ ॥

आयातोऽत्रभवान् कृतः पुनरयं त्रेता तथा द्वापरो
घूर्णन्ते पदमूलयोर्युगगणा भ्रूसंज्ञयैवास्य ते ।
प्राप्तश्चैव कलङ्कयन् कलिरयं साध्वीस्तु वृत्तीर्महा-
नेतस्मात् परिरक्षतात्र विटसम्राजोऽप्रमादैः सदा ॥ ५ ॥

क्षेपिष्ठोऽस्य रथः प्रतिक्षणमसौ वेगेन चित्तं जयं-
स्तिष्ठत्यद्य रघोः कुले सुविमले श्वः कौरवाणां पुनः ।
यच्छन्नेव समुन्नतिं क्षणमहो मान्धातृभूपादिके
पक्ष्मस्फालन एव पातयति तां कालः करालः खलः ॥ ६ ॥

पुत्रान् हन्मि हरामि शीघ्रमदयः पत्युः सतीनामसून्
रोगक्षामदुरीतिदाससहितः क्रीडामि भूमण्डले ।
तृप्तिं याति तथापि नैव हृदयं भूमिं ममाप्यश्नत-
श्चेत्यादीन् शृणुताद्य भूतसदृशः कालस्य कोलाहलान् ॥ ७ ॥

वत्सः प्रीतिनिधिर्हृतो मम बलात् तारुण्यसम्पद्धृता
कान्तारत्नमपाहृतं मम विवेकाख्यश्च चूडामणिः ।
एवं क्रन्दति जीवलोकगहने मर्त्याध्वगानां गणे
कालो धावति चोरवीर इह भोः सर्वं लुठित्वा शठः ॥ ८ ॥

व्याधं धीवरधूर्वहं वृकमतः सर्पं विटाग्रेसरं
दृप्यन्तं बहुनिर्घृणं खलु खलं भूतं जगद्भक्षकम् ।
मायावन्तमिमं च चौर्यचतुरं दुर्दम्यमुग्रं दृढं
कालं रोद्धुमुपाश्रयध्वमयि भोस्तं कालकालं शिवम् ॥ ९ ॥

पितामहपदं धन्यम्

अ. वि. काणे

नानारत्नप्रभववसुधा धातृसङ्कल्पितैषा
तेषु प्रायो विलसति पुनर्मूर्ध्नि पौत्राख्यरत्नम् ।
नप्ता चास्मत्सदनसुखदः सार्थनामा विवेको
वृद्धावस्थां प्रतिगतहृदामेष चक्षुर्विनोदः ॥ १ ॥

किं वा तेषां सितकचवहां यष्टिकाधारिणां वा
संतोषस्य प्रभव इव वा नन्वसौ निर्झरो वा ।
आयुः सायंसमयवशिनामेकमेवाद्वितीयं
प्रेमस्थानं समुचितमसौ कौतुकस्यास्पदं वा ॥ २ ॥

किं वा कालक्रमगतिवशाज्जीर्णगात्राङ्गभाजां
स्वादुस्पर्शः सुखमनुपमं तस्य पुष्णाति तेषाम् ।
प्रायेणायं वयसि च ततः पश्चिमेऽवस्थितानां
बालोद्यानं नवकुसुमितं वा गृहेन्दुर्नवोत्थः ॥ ३ ॥

किं वा तेषां भवगदविपद्ग्रस्तचित्तातुराणाम्
आयुर्मार्गभ्रमणपरिसंश्रान्तनृणामयम् वा ।
कोषस्तोषस्य च विषय एव प्रधानो रुचीनाम्
वृक्षच्छाया किमुत मधुरं शीतगङ्गाम्बु तेषाम् ॥ ४ ॥

तन्वानं तं मुखमधुरतां मन्मनोराजहंसं
स्कन्धे कृत्वा व्रजत इव मे पूर्णतामेति मोदः ।
स्वक्षः स्वङ्गः स्वजनसुखदः स्वस्तिभावनुबन्धः
केषां नैष प्रकृतिरुचिरश्चोरयत्याशु चेतः ॥ ५ ॥

नप्तुर्लाभः स्मृत इति ततो भाग्यवश्यो भवेऽस्मि-
स्तस्य प्राप्तिर्गुरुजनमनोरञ्जनानंदहेतोः ।
दैवायत्तं सुखमसमसाधारणं निर्विकल्पं
भुञ्जानोऽहं तदपि च सुखं वाञ्छितं वृद्धवृन्दैः ॥ ६ ॥

श्रृण्वंस्तस्याननकमलजां भारतीं भावगम्यां
बोद्धव्यैषा प्रथमभणितिस्तत्तनोश्चालनैस्तैः ।
जिघ्रन् स्नेहादपि च मधुरं तन्मुखच्छ्वासगन्धं
पश्यन् प्रेम्णा वदनसुषमां यापयाम्येव कालम् ॥ ७ ॥

श्रीदः श्रीशः परमपुरुषः श्रीधरः श्रीनिवासः
तस्मै दद्यादविरतसुखं दीर्घमायुर्दयालुः ।
लीलालोलाभिमतबहुलो बालचन्द्रो मदीयो
भूयात् पद्मारमणकृपया पण्डितः पण्डितानाम् ॥ ८ ॥

सौन्दर्यसमीक्षणम्

टि. जि. सिद्धप्पाराध्यः

अन्यः सुरूपी न तथाहमस्मी-
त्येवं विचिन्त्यास्ति जनो विरूपः ।
मुखं समीक्ष्यैव सुरूप एषः
इतीह सञ्चिन्तयितुं न युक्तम् ॥ १ ॥

अन्यः सुरूपी मुखतः किमास्ते ?
उतात्मतो वेति विवेचनीयम् ।
मुखे किमास्ते निजरूपमस्य ?
कुतस्तदालोकनतो भ्रमोऽस्य ? ॥ २ ॥

अन्यं समालोक्य परः कुरूप-
मात्मानमेवं परिचिन्तयेच्च ।
यथार्थरूपं किमु बाह्यमान्तरम्
एवं न मौढ्यादिह जानते जनाः ॥ ३ ॥

यथार्थसौन्दर्यमिहास्ति कुत्र ?
न बाह्यवेषे न च मज्जनादौ ।
देहे मुखं स्याद्यदि सुन्दरं ते
निर्जीवदेहे न किमिष्यते तत् ? ॥ ४ ॥

प्रयाणकालेषु जनाः परस्परं
मुखानि दृष्ट्वैव भवन्ति विह्वलाः ।
मुखस्य सन्दर्शनतस्तदीय-
सौन्दर्यविज्ञानमशक्यमेव ॥ ५ ॥

ये चित्तचाञ्चल्यवशं गतास्ते
मोहेन दृष्ट्वाऽन्यमुखं विदूरे ।
मुखं स्वकीयं ह्यनवेक्षमाणाः
ततोऽन्यसक्ताः प्रलपन्ति मौढ्यात् ६ ॥

कथं भवेयुस्त इमे सुरूपाः ?
सुचित्तवन्तः स्युरिमे यदीह ।
तदैव शान्ताः खलु सुन्दराश्च
भवेयुरेते निजसौख्यवन्तः ॥ ७ ॥

नैजं हि सौख्यं न बहिःस्थरूप-
सन्दर्शने वर्तत इत्यवेहि ।
स्वस्मिंस्तदस्ति ; स्वयमेव वेद्यं
स्वकीयरूपस्य विलोकनेन ॥ ८ ॥

स्वान्तःस्थरूपं कथमद्य वेद्यम् ?
ततः सुरूपी भवतीह किं ना ? ।
स्वान्तः किमस्तीति तु वेद्यमद्य ?
तदेव नित्यं निजसौख्यमूलम् ॥ ९ ॥

बीजे यथान्तर्निहितोऽस्ति वृक्षः
क्षीरे यथान्तर्निहितं घृतं हि ।
इक्षौ यथान्तर्निहितं गुडं च
जीवे तथान्तर्निहितोऽस्ति देवः ॥ १० ॥

स दर्शनीयः खलु सर्वदैव
तदैव मोहोऽपि विनश्यतीह ।
तद्दर्शनं येन च लब्धमद्य
स एव रूपी खलु सत्यवेत्ता ॥ ११ ॥

य एव वेत्त्यात्मगतं तमेनं
स एव धन्यो भवति प्रशान्तः ।
स सुन्दरः स्यादिह निर्मलश्च
तदेव सौन्दर्यसमीक्षणं स्यात् ॥ १२ ॥

देवः कथं वीक्ष्य इहात्मगूढः ?
कथं च लभ्यो भवतीह योगात् ? ।
न दृश्यतेऽसौ बहिरिन्द्रियेभ्यः
परं तु लभ्यो निगृहीतचित्तात् ॥ १३ ॥

जानाति यस्तस्य निजस्वरूपं
स एव योगी निजसौख्यवांश्च ।
न तस्य चोदेत्यवलोकनेच्छा
परानन्तस्य व्यवहारकाले ॥ १४ ॥

दृष्टेषु सर्वेषु स देवमेव
पश्यन् सुखी स्यादिह धन्यभावात् ।
स्वस्मिन् स्वदेवं परिगृह्य धन्यो
प्रव्याहरेदप्यविलिप्तभावात् ॥ १५ ॥

निमित्तमात्रं व्यवहर्तुमत्र
प्रवर्तते तादृगयं विवेकात् ।
न चाभिमानाद्दुरहंकृतेर्वा
सौन्दर्ययोगी कुरुते प्रवृत्तिम् ॥ १६ ॥

अध्यात्मसौन्दर्यमिदं सदैव
संलब्धुमेकः प्रयतेत योगात् ।
विनैव तद्दर्शनमन्यतो यः
पश्येद्यदासौ भवतीह मूढः ॥ १७ ॥

आत्माऽवलोक्यो मनसावधानात्
स्वस्मिन् परत्रापि विहारकाले ।
स्वस्मिंश्च यो विश्वसिति प्रशान्तः
स्वात्मानुभावं लभते स नित्यम् ॥ १८ ॥

स्वात्मानुभावः खलु भावनायाः
क्रियायुतायाः समवाप्यतेऽद्य ।
स एव सौन्दर्यनिधिः समन्तात्
स एव सारस्वतवैभवं स्यात् ॥ १९ ॥

सौन्दर्यसन्दर्शनमेतदेव
स्वस्मिन् परत्रापि तदेव लभ्यम् ।
तदैव मोहो विसृजेत् पुमांसं
नारीं तथा निर्मलभावतोऽद्य ॥ २० ॥

निर्मोहदृष्टिर्निजसौख्यमूलं
सैवेह शान्तिः स्थिरचित्तयोगः ।
सैवेह सौन्दर्यसमीक्षणं स्यात्
सैवेह लभ्या युवकैः स्वशक्त्या ॥ २१ ॥

तदेव सौन्दर्यमिहात्मसाद्यः
करोति नित्यं स मुनिर्भवेद्धि ।
लोके सयत्नाः पुरुषाः स्त्रियश्च
भवेयुरेवं क्रमशः प्रयोगात् ॥ २२ ॥

मुखस्य सौन्दर्यमतश्च पुंसि
शक्तेर्विकासं ह्यवलम्बतेऽद्य ।
सा चापि शक्तिः खलु वीर्यरूपा
वीर्यप्रकाशाद्विलसेन्नरोऽत्र ॥ २३ ॥

वीर्यप्रकाशोऽप्यवलम्बतेऽस्मिन्
चित्तस्थिरत्वं दृढनैष्ठिकत्वम् ।
तृप्तिं मनोनिर्मलतां हृदश्च
विकासमेतैरिह शोभतां ना ॥ २४ ॥

सैवेह शोभा ननु साधनीया
सौन्दर्यमूला सुखदा बलिष्ठा ।
तस्याः पुरो व्यर्थमिदं मुखस्य
रूपं; न तत्र प्रसरेत् स्वदृष्टिः ॥ २५ ॥

कविः

श्रीदुर्गादास गोस्वामी

मन्ये विचिन्तयसि यत् कविरत्र लोके
भावस्य वर्णविभवैर्वचसश्च भङ्ग्या ।
आलेख्यमेव लिखति प्रमुदा न तस्य
दायित्व-कृत्य-करणादिकमस्ति किञ्चित् ॥ १ ॥

तृष्णाक्षुधादिकमपीह न चास्ति तस्य
लुब्धश्चकोर इव सान्द्रसुधां सुधांशोः ।
नित्यं निपीय गमयत्यवनीतलेऽस्मि-
न्नेकैकशो दिवसरात्रिपरम्पराः सः ॥ २ ॥

न्याय्यं न भाषणमिदं न कविः सदैव
रोमाञ्चमञ्चति परं भुवि सोऽपि कुर्यात् ।
स्त्री-पुत्र-भृत्य-सुहृदादिकपोषणानि
भाषेत सत्यमनृतं च कदाप्यगत्या ॥ ३ ॥

हट्टापणादिविषयानिह सोऽपि गच्छेत्
सञ्चिन्तयेदपि सहस्रश एव नित्यम् ।
स स्वर्णकार-रजकप्रभृतिप्रदेया-
नर्थान् गृहोपकरणानि च पुष्कलानि ॥ ४ ॥

नूनं समाजपरिवारगतानुशिष्टि-
र्मान्यैव तेन सकलाऽऽतुरसेवनं च ।
अन्नाशनोपनयादिकमात्मजानां
कार्यं सुतापरिणयादिकमप्यनेन ॥ ५ ॥

आत्मीयताः स्वजन-लौकिकताश्च लोके
नानाप्रथाः स्वपरिवार-समाजनिष्ठाः ।
आदेय-देयततयो विपदापदश्च
तेनात्र हन्त! कविनाप्यवशं विषह्याः ॥ ६ ॥

स्नेहाधिकारजनिता विविधार्थनाश्च
नानानृणामिह विषह्य विचित्ररूपम् ।
संसारमेतमनुवर्तयते विलाप-
हास्यादिसम्भृतमहो ! कविरत्र सोऽपि ॥ ७ ॥

कामं तथापि तनुरन्ध्रपथेभ्य एषां
द्वित्राः क्षणास्त्रिचतुरा उत वा प्रमादात् ।
निर्गत्य तत् कविमनः सुदृढं स्पृशन्तो
द्राक् पूरयन्ति तदनिर्वचनीयमोदैः ॥ ८ ॥

उत्तीर्य देश-समयावधिमात्मशक्त्या
लोलान् क्षणान् सपदि तानमृतान् विधाय ।
काव्येऽनवद्यरचनेऽपि च चित्रगीते
स्वे रक्षति स्वयमहो ! रसदिव्यलोके ॥ ९ ॥

भ्रातर्यथार्थवचनं त्वमवेहि भूमा-
वेकः स्वतन्त्रपुरुषः स कविस्तदा स्यात् ।
स्याच्चेतना न खलु तस्य तदा तु कापि
कस्यामपि स्व-परयोरपि याचनायाम् ॥ १० ॥

विस्मृत्य तु क्षणमहो ! निजदुःख-शोकान्
वायुस्तरेषु च तदा प्लवते कवेस्तत् ।
चित्तं मुहुर्मुहुरहो ! निजकल्पतोके
कस्मिन्निव ध्वननवत् प्रणयार्द्रगीतेः ॥ ११ ॥

हन्तापयान्ति निखिलान्यपि फल्गुताया-
स्तस्यार्गलानि च तदा, स तदाऽन्यभूतः ।
भावप्रमत्तहृदयः, स्वयमेव वीणा-
पाणेः करे तदसवो नियतास्तदोच्चैः ॥ १२ ॥

तस्मात् तदा मृदुलकम्पनतः प्रकाश्य
स्वां विक्रियां सपदि तस्य समुच्छ्वसन्तः ।
प्राणाः स्खलन्ति बहुधा दरशीतवातैः
स्पृष्टा नभोजलधरा इव बाष्पनम्राः ॥ १३ ॥

"न मे कर्म विकुरुते"

स्वामिनाथ आत्रेयः

ब्रह्मलोके महान् संरम्भः ।

भवानीपतिः कमलापतिश्च समागतौ सदारौ सपरिवारौ । वृषभो विविक्ते गरुडेन समेत्य कुशलं परिपप्रच्छ । स्वस्वस्वामिनोः, अत्र समागमे निदानं विमृश्यापि नान्वविन्दताम् ।

सप्तर्षयः ब्रह्मर्षयश्च त्रिमूर्तीनां अप्रार्थितप्रसक्तेन दर्शनेन नितरां कृतार्थभावाः सामसूक्तानि त्रिमूर्त्यधिकृतानि विनिमयेन जेपुः ।

भारती च भवानीं रमां च यथायथं समासाद्य रहस्यं च प्रकाशं च यद्वृत्तं-तत्सर्वमभिललाप ।

चतुर्मुखस्तु अतर्कितोपनतेन भगवतोः समागमेन नितरां प्रहृष्टहृदयोऽपि तयोः आराधने यौगपद्यं नूनतयाऽभ्यस्यन् पदे पदेऽस्खलत् । तयोश्च सानुशयपरिहासपात्रमभवत् ।

उपरतायां अभ्युत्थानप्रक्रियायां यथायथम आसीनाः त्रिमूर्तयः सस्मितम् अवैक्षिषत । "धन्योऽस्मि भवतोरत्र समागमेन । प्रेष्योऽहं यद्याज्ञापितः तत्रैव सन्निदध्यां यत्र कुत्राप्याहूतः" इति सविनयमवोचत् प्रजापतिः ।

विष्णुः—लोकैः सर्वैः अपि आराधितौ आवाम् अस्मदुभयैकाराधनीयस्य भवतः सकाशम् आगत्यैव स्वधर्माचरणं किञ्चिदिव कृतम् अभिप्रैवः ।

शम्भुः—नैतावता । भगवतो विष्णोः कर्म-रक्षणात्मकं स्वधर्मेण साध्यते । "धर्मो रक्षति रक्षितः" । मम तु कर्म संहारः धर्मापाये स्वयं सिध्यति । "धर्म एव हतो हन्ति" । एवं च सावकाशौ आवाम् । भगवान् स्वपिति । अहं च नृत्यामि । भवतस्तु सृष्टिकर्म भवन्तं

नैरन्तर्येण व्याप्नोति । कुतो भवतोऽवकाशः? अतो युक्तम् आवयोः अत्र आगमनम् ।

ब्रह्मा—सभाजितोऽस्मि । मम कर्मणः दुर्भरत्वं च सम्यगुद्भावितं भगवता.....

मुकुन्दः—तत्समालोचनमपि अर्थः अत्रागमनस्य ।

अजः—नितरां धन्योऽस्मि भवतोः अनुकम्पया ।

सदाशिवः—कोऽयं संरम्भः भूलोके-प्रजननिरोधो नाम; 'दुर्लभं मानुषं जन्म पुण्यैः बहुभिः आप्यते'—इति खलु धर्मव्यवस्था । लोकस्तु पापभूयिष्ठः दृश्यते । तर्हि पुण्यजन्मानः मानुषा विरलाः पापजन्मानस्तिर्यञ्चस्तु भूयिष्ठाः इति खलु भाव्यम् । कथमिदं विपरीतं दृश्यते!

विष्णुः—अन्यच्च । स्वजातिप्रजननिरोधे प्रसक्ता जनता हिंस्राणां वन्यानां मृगाणां रक्षणे अतीव श्रद्धां प्रकटयति!

शम्भुः—किमिदं सृष्टिरहस्यम्?

अजः—ननु नाविदितं भवतोः । अथापि वक्ष्ये । प्रथमकल्पे द्वितीयकल्पे च या सृष्टिः भवतोरनुग्रहेण प्रसक्ता, तामनुसृत्य आदौ मया श्वेतवराहकल्पे सर्वा सकोशा सशरीरा सेन्द्रियग्रामा संपूर्णा समुद्भाविता । ततः परं प्रजापतयः सृष्टिकर्मणि नियोजिताः । तत आरभ्य स्त्रीपुरुषयोगेन सेन्द्रियग्रामाणि शरीराणि सृज्यन्ते । मम तु कर्म जीवानां कर्मानुरोधं तेष्वनुप्रवेशेन परिसमाप्यते । यावन्तो जीवाः तावन्तः शरीराणि । तेषां विनियोगस्तु कर्मानुरोधेन ।

केशवः—अस्तु नाम । तथापि नरजातिः कथम् अधिका?

ब्रह्मा—लोके हि मदनस्य प्रभावो मनुष्येषु अधिकः । मृगेषु म्लानः । अतश्च नरशरीरोद्भवो भूयान् ।

शम्भुः—तथापि पुण्यकर्मवशेनैव हि मानुष्यप्राप्तिः संभाव्यते ?

ब्रह्मा—जन्मना वैशिष्ट्यं पुण्यपरिपाकसंभृतं शास्त्रेषु यदुक्तं—तस्याद्यतना मनुष्या न विषयीभवन्ति । अद्य दुरितवासना बलीयसी नरजन्मसु । सा च जन्मसंहतिमनुक्रान्ता शनैः मनुष्यस्वभावे महतीं विपरिवृत्तिम् आपादयति । जन्मना मनुष्या अपि बहवो मृगप्रायाः—चापल्ये शुनकाः—रसाविवेके गर्दभाः—विना वैरं च हिंसायां वृकाः—वञ्चने सृगालाः—अतिसन्धाने बकाश्च—दृश्यन्ते ।

नारायणः—अहो वैचित्र्यं त्रिविधस्वभावप्रभावपरिपुष्टिश्च ब्रह्मसृष्टेः ।

कमलासनः—ननूच्यते मया—नेदं मम विलसितं—न मया चिन्तितमपि । एवं सृष्टिप्रवाहः स्वयमेव संपद्यते । परन्तु इदम् अनुगुणमेव मे कर्मानुरोधेन जन्मापादने ।

मृडः—कथमिव ?

वाणीपतिः—यदयं अन्नसंघातः - विना चिन्तनं विना पश्चात्तापं - संभ्रियते मनुष्यैः । तन्निर्हरणाय नरेतरभोगशरीरापादने यदि प्रसजेयं-तर्हि परार्ध-द्वयमपि ममायुः न पर्याप्तम् । तदा चान्ते असमाप्तस्वक्रियतया धर्मवैगुण्यमेव मे संपद्येत । दिष्ट्या तत्र मार्गो मे विवृतः ।

माधवः—लाघवं किमपि संपन्नम् ?

स्वयंभूः—अनेकतिर्यक्स्वभावजुष्टे मनुष्यस्य एकस्मिन् जन्मनि बहूनां दुरितानां निर्हारः विधीयते । जन्मशतदुरितपरिपाकः एकस्मिन्नेव नरजन्मन्यनुभूयते मनुष्येण । शुनक इव दृष्टमात्रः ताड्यते निर्दयम् । खर इव दुर्भरं भारं नयति वहति च । वराह इवामेध्यं शिरसा वहति । गृध्र इव उच्छिष्टं भुनक्ति । श्वापद इव विण्मूत्रविसर्गं करोति । आखुरिव पर्युषितं भक्षयति । सर्वदा कृमिकीटावासः सुखमपि भोक्तुं

अशक्नुवानः परितप्यते । न हि वराहो जन्मना शुनकमनुकरोति । काको वा गृध्रम् ; नर एव बहुमृगस्वभावम् अनुकरोति ।

गोविन्दः—परमयं महान् विषादविषयः-गृध्र इव उच्छिष्टं भुञ्जानः आखुरिव पर्युषितं भक्षयन् वा न खिद्यति । परन्तु मोदते । कथम् एवं पापनिर्हारः स्यात् ।

भर्गः—दुरितवासनया पशुस्वभावजुष्ट इति पूर्वमेवोक्तं भगवता ब्रह्मणा । किमत्र विषादेन ?

ब्रह्मा—यद्येवमपि पापनिर्हारो न संभवति न जाने कथं वा कर्म मे सुविहितं भवेदिति ?

मधुसूदनः—एवं च अत्युत्तमं नरजन्म अधमाधमां गतिं अवाप्यापि बहुलीभूयापि प्रारब्धनिर्हाराय नालं भवतीति भवतां चिन्ता । "हिंस्रान् मृगानपि वा वर्धयामः । तैः सह वसामः । सजातीयानां सधर्मणां मनुष्याणां तु बाहुल्यं नाभिसहेमहि" इति जनानां स्पर्धा ।

भवः—मध्ये रक्षणजागरूकस्य भवतो महती व्यथा । भवतु । आदौ भगवता कमलासनेन उक्तं "मदनस्य मानुष्यके महान् प्रभावः तिर्यक्षु तु न्यून" इति । कुतोऽयं भेदः क्रियते तेन ?

त्रिविक्रमः—स एव मदनः प्रष्टव्यः ?

(मन्मथः प्रविशति)

मनसिजोऽहम् अभिवादये ।

शर्वः—अथे स्मृतमात्रः सन्निहितः ।

मन्मथः—भवतोऽपि स्मृतिपथम् आरूढ इति किमितोऽपि महत्तमं मे भाग्यम् ? न हि पुनरपराद्धुं मनसाऽपि चिन्तये । श्लाघितुम् अथवा पर्यनुयोक्तुमयमाहूत इति तु स्फुटति मे हृदयम् ।

सदाशिवः——श्रूयते तव मनुष्येष्वेव महान् विलासः अन्यत्र नातीव प्रवेश इति । किमिदं सत्यम्?

मन्मथः——तथा हि!

शंभुः——कुत एवम्?

मन्मथः——ममेयं असभ्यव्यवहारमत्र प्रपञ्चयितुं जिह्रेमि ।

सदाशिवः——असभ्यमाह मां कदाचित् दक्षः ।

श्रीधरः——मामप्याह शिशुपाल एवम् । तदस्मत्पुरतः न हि किमप्यसभ्यं नाम । कथय!

मन्मथः——आहारनिद्राभयमैथुनानि जीवसामान्यस्य प्रवृत्तिनिमित्तान्युदाहृतानि । तत्रान्तिमे साहाय्यं विधातुम अहं नियुक्तः विधात्रा । ब्रह्मणः प्रथमाः सृष्टयः सत्त्वप्रधानाः पुनः सर्गे अप्रयतमानाः पुनर्लीनाः ब्रह्मणीति यूयं जानीथ । अत एवाहमादिष्टः मनोमथनाय । मम विश्रृङ्खलां विजयधोरणीम् आलोक्य भीता मनुष्यजातिः आदौ वस्त्रलज्जाव्रतादिकम् आलंब्य मां न्यरुणत् । तदा च ममाऽऽग्रहोऽभिवृद्धः । गूढस्यैव चमत्कारकारिताम् आपद्य पुनस्ताम् अभ्यभावयम् । एवं जितामपि जनतामहम् अन्वगृह्णां रसपोषणेन । जितापि सा रहसि सुखसंविदमवाप्य हृष्टा मामपूजयत् । मृगपक्षिषु वस्त्रलज्जादिप्रतिरोधाभावेन न मया आग्रहः कृतः । ते च यथासंभवं सङ्गम्य मनोऽभिषङ्गं विना प्रजननमात्रव्यापृताः प्रावहन् संसारे । ..... एवं आसीत् पुरा!

शंभुः——ननु का कथा अद्य?

मदनः——अमूमेव असभ्यतां मनुष्यजातेः विस्तरेण गदितुं लज्जे ।

हृषीकेशः——का नाम असभ्यता मनुष्यजातेः?

मन्मथः—शनैः शनैः चतुष्पात्प्रायं जीवनं आतन्वानाः मनुष्याः वस्त्रलज्जाव्रतादिषु नितरां निर्वृतचित्ताः मम गूढचमत्कृतिरूपं छलमपि शिथिलयन्ति । ललनास्तु यावत्सूक्ष्मस्य तावत्संकुचितस्य वस्त्रस्य धारणेन आकर्षणमिव कुर्वन्तः वस्तुतः चमत्कारेण विहीयन्ते । युवानस्तु स्त्रीमात्रोचितैः वस्त्रैः आभूषयन्तः प्ररोचयन्त इव स्त्रीषु दर्शनोत्साहमपि मुष्णन्ति । वाक् च भाषणे लेखने च व्यङ्ग्यमर्यादाम् उदास्य स्त्रीपुंयोगस्य नीरसताम् आपादयति । एवं स्थिते का मे विजयाशा ?

ब्रह्मा—ननु सत्यं निराशस्त्वम् ?

विष्णुः—सत्यं निराशया खिद्यसि ?

शंभुः—तत्र कमपि प्रतीकारम् अपेक्षसे ?

मन्मथः—सत्यं निराशोऽहम् । परन्तु न सर्वथा खिन्नोऽस्मि । नापि प्रतीकारम् अपेक्षे । यदि भवन्तोऽनुमन्येरन् - अहमप्यस्या वृत्त्या विश्रान्तिम् इच्छामि ।

शंभुः—अरे रे ! तवाप्यद्य प्ररोचनम् अपेक्ष्यते । हन्त ! तदन्यदा चिन्तयामः । साधय यथाऽऽगतम् ।

(मदनस्तिरोहितः ।)

[त्रयोऽपि मूर्तयः अन्योन्यं अवेक्ष्य प्रहसन्ति ।]

सदाशिवः—एवं च लोके प्रजाबाहुल्यसङ्करस्य निवृत्तिः सन्निहितेव ।

ब्रह्मा—कथमिव ?

नारायणः—एवमिव । मृगपक्षिषु मन्मथस्य प्ररोचनाभावेन सर्गः मर्यादाम् अनुल्लङ्घ्य संकुचितो लक्ष्यते । एवं जनतायामपि वस्त्रलज्जादि-

आवरणापनयनेन चमत्कृतिविनाशे - प्ररोचनाभावे - प्रजासर्गः शनैः हीयेत खलु ।

ब्रह्मा—ननु किमिदमस्माकमभिमतम् ?

सदाशिवः—किं नाम अस्माकं अभिमतमिति ? त्रिभिः अस्माभिरेषा लीला प्रवर्तिता । चतुर्थश्च मनुष्यः विवेकमनुग्राहितः प्रतिखेलनाय निसृष्टः । यदि स न यथायथं प्रतिखेलति का नो हानिः ?

नारायणः—लीला च स्वयम् उपसंहृता भवति ।

(देव्यः प्रविशन्ति ।)

पार्वती—किमत्र लीलोपसंहारविषयः प्रस्तूयते ?

विष्णुः—अस्ति भवतीनाम् आक्षेपोऽत्र ?

कमला—अस्मदाक्षेप उपक्षेपो वा न हि भवतां कार्यकारी ।

ब्रह्मा—भवतीनाम् उपक्षेपः सर्वथा कार्यकार्येव । अत एव हि लीला प्रसृता ।

सरस्वती—अस्मदाक्षेपं तु नाङ्गीकुर्युः भवन्तः ।

सदाशिवः—शिवोऽहं सर्वत्र तूष्णींभावम् अभ्यस्यामि ।

नारायणः—अहमपि शेषपर्यङ्के पादावुल्लाघयितुम् उत्सुकोऽस्मि ।

ब्रह्मा—आश्वासितोऽस्मि सर्वथा न मे कर्म विकुरुते इति ।

(इति परस्परमालिङ्ग्य प्रतिष्ठन्ते स्वस्वभवनम् ।)

महती विचित्रता

दि. म. पाण्ड्यः

निरञ्जनः—अहो रश्मिकान्त, अपि कुशली भवान्?

रश्मिकान्तः—कुशल्यस्मि, निरञ्जन, कुशली। अप्यस्ति कापि वार्ता?

निरञ्जनः—अस्मत्सहाध्यायिन्यलकामहोदया भवन्तं स्मरति।

रश्मिकान्तः—केन सा परिणीता?

निरञ्जनः—अपरिणीता सा।

(विद्युत्संवादयन्त्रस्य[1] रवः।)

रश्मिकान्तः—(संवादयन्त्रे) भोः, कस्त्वम्?

अलका— ,, एषाऽहमलका।

रश्मिकान्तः— ,, भवती क्षणान्तरेणैव निरञ्जनमहोदयेन स्मृता।

अलका— ,, गतवासरे तत्रभवान् मिलितः। भवन्तमहं किञ्चित्प्रष्टुमिच्छामि।

रश्मिकान्तः—(संवादयन्त्रे) पृच्छतु भवती यथेच्छम्।

अलका— ,, अपि भवान् परिणीतः?

रश्मिकान्तः— ,, नाहं परिणीतः।

अलका— ,, गते वर्षे भवता क आयः प्राप्तः?

रश्मिकान्तः—(कायस्थं[2] प्रति) भोः कायस्थ, को मे गतवर्ष आयः अभूत्?

कायस्थः—सार्धपञ्चसहस्राणि रूप्यकाणि।

---

१. Telephone.

२. Clerk.

रश्मिकान्तः—(संवादयन्त्रे) षट्सहस्राणि रूप्यकाणि ।

अलका— ,, किं ते व्यक्तिगतमाध्यापनमूल्यं[३] प्राप्तम् ?

रश्मिकान्तः—(संवादयन्त्रे) अष्टशतानि रूप्यकाणि ।

निरञ्जनः—वस्तुतः किं प्राप्तम् ?

रश्मिकान्तः—न किञ्चिदपि ।

अलका—(संवादयन्त्रे) किमन्यैर्मार्गैः[४] प्राप्तम् ।

रश्मिकान्तः—(,,) पञ्चशतानि रूप्यकाणि ।

निरञ्जनः—किमर्थमेतद्वास्तवातिक्रमणमङ्कैः ?

रश्मिकान्तः—अपि न जानासि केनचित्कविनोक्तम्—

गङ्गां च धारयति मूर्ध्नि सदा कपाली
सा तस्य चुम्बति मुखं न कदाचिदेव ।
रत्नाकरं प्रति चुचुम्ब सहस्रवक्त्रै-
र्गङ्गादयो युवतयः सधनानुकूलाः ॥ इति ।

अलका— (संवादयन्त्रे) किं भवतो वयः ?

रश्मिकान्तः—(,,) पञ्चविंशतिवर्षाणि ।

अलका— (,,) सर्वमेतन्मया लिखितमन्यद्यदावश्यकमस्ति तत्सर्वमायकरपत्रके[५] पूरयित्वा प्रेषयत्विति विज्ञप्तिः । अहमत्रायकराधिकारिण्यस्मि । यदि किञ्चिदपि कार्यं संभवेत्तर्हि कथयतु भवान् । नमस्ते ।

---

३. Tuition fees.

४. Income from other sources.

५. Income Tax form.

रश्मिकान्तः—भो निरञ्जन, महती विचित्रता संभूता ।

निरञ्जनः—का सा ?

रश्मिकान्तः—मयाऽऽयकरपत्रके प्राप्त्या न्यूनम्, अहं च द्विपुत्रवानास्मि इति लिखितम्; अद्य च मयालकां प्रति प्राप्त्याधिकम्, अहं चापरिणीतोऽस्मीत्युक्तम् ।

निरञ्जनः—तस्या अपि महती मे विचित्रता ।

रश्मिकान्तः—नाहं जाने । कथयतु भवान् ।

निरञ्जनः—गते वर्षेऽहं मोहमयीं गतवान् । तत्र चानुगुणदारविहीनस्य सुखं नास्तीति विचिन्त्य योग्यसहचरीप्राप्तये मयैकोपायश्चिन्तितः । ततस्तत्रैकस्मिन्महाविद्यालये नारीरूपेण निरञ्जनेति नाम्ना अहमध्ययनार्थं प्रविष्टवान् ।

रश्मिकान्तः—किमर्थं नारीरूपेण ?

निरञ्जनः—श्रूयतां सर्वो वृत्तान्तः । ततो रसज्ञाख्या मोहमयीनिवासिन्येका कन्या मया दृष्टा । दिनेषु गच्छत्सु आवयोस्सङ्गो वृद्धिं गतः । एकदाऽऽवयोरेवमालाप आसीत्—

रसज्ञा—अयि निरञ्जने, कस्मात्स्थानाद्भवत्यागच्छति ?

निरञ्जना—रसज्ञे, गुर्जरप्रदेशात् । त्वं कुतः ?

रसज्ञा—अत्रैव निवसाम्यहम् ।

निरञ्जना—क स्तस्ते पितरौ ?

रसज्ञा—तौ पञ्चत्वं गतौ । क स्तस्ते ?

निरञ्जना—मम पितरौ भवनगरे निवसतः । केन सह त्वमत्र निवससि ?

रसज्ञा—मम भगिन्या सह । केन त्वम् ?

निरञ्जना—अहमत्र छात्रालये निवसामि ।

रसज्ञा—तर्हि तु यदेव कार्यं भवेत्तद्वक्तव्यम् ।

निरञ्जना—नास्त्यद्य किमपि । यदा भविष्यति तदा कथयिष्यामि ।....

निरञ्जनः—रश्मिकान्त, एवमनेकप्रसङ्गैर्मया ज्ञातमेषा मम सहधर्मचारिणी भवितुमर्हति इति । अतो मयाऽपि तया सह पठनमारब्धम् । आवयोः स्नेहशृङ्खला दृढाऽभूत् । ततः क्रमेण वार्षिकपरीक्षायाः समयः संवृत्तः । एकस्मिन्दिन आवयोर्मेलनं निश्चितम् । तदा—

रसज्ञा—(स्वगतम) निरञ्जना कुतो नागता ? अवश्यमेव साऽध्ययने प्रवृत्ता । किंतु सा मां विहाय किञ्चिदपि न पठति । कथं सा विलम्बिता ? अपि मार्गे किञ्चिदयोग्यं वृत्तं स्यात् ? एतन्मे चित्तं शून्यं भवति । .....एषाऽऽगता सा ।

निरञ्जना—क्षम्यतां विलम्बः ।

रसज्ञा—अपि क्षम्यतामिति शब्दाभ्यामेवालमेतत् । अपि ज्ञायते त्वया किं चिन्तितं तर्कितं च मया इति ? मम चित्तं शून्यमेवाभूत् ।

निरञ्जना—किन्तु सखि, मम घटिकायन्त्रं स्थगितमस्ति ; अतो नाहं जाने कः समयो वर्तत इति ।

रसज्ञा—तर्कोऽनेकान्युत्तराणि प्रयोजयति ।

निरञ्जना—नैतत्तर्कप्रयुक्तमुत्तरम् । वास्तवमेवास्त्येतद् ।

रसज्ञा—यद्भूतं तद्भूतं, किन्तु त्वं मे हृदयव्यथां न जानासि । त्वया विनाहं क्षणमपि स्थातुमक्षमा ।

निरञ्जना—यद्यावयोः कोऽपि पुरुषो भवेत्तर्हि सोऽन्यां परिणेतुमिच्छेदिति मे मतिः !

रसज्ञा—योग्यमेव भवेत् तत् ।

निरञ्जना—अप्यधिकं किञ्चित्पठितं वा न वा ?

रसज्ञा—त्वया विनाध्ययने चित्तं मे न स्थिरं भवति । अथ च पठनादपि त्वच्चर्चयाधिकमहमवगच्छामि ।

* * *

निरञ्जना—रसज्ञे, एषाहमद्य गृहं गन्तुमिच्छामि । त्वं क्व स्थास्यसि ?

रसज्ञा—अहमत्रैवास्मि । कदा त्वमागमिष्यसि ?

निरञ्जना—न तन्निश्चितम् । किञ्चित्त्वामहं वक्तुमिच्छामि ।

रसज्ञा—कथयतु भवती स्वैरम् ।

निरञ्जना—एषोऽहं नारी नास्मि, किन्तु निरञ्जनो नामा पुरुषोऽस्मि । अपि च चिरपरिचयात्त्वां परिणेतुमिच्छामि ।

रसज्ञा—न तच्छक्यम् ।

निरञ्जनः—कुतः ।

रसज्ञा—अद्य यावत् किमर्थमहं वञ्चिता ?

निरञ्जनः—मर्षयतु भवती । नैषा वञ्चना, किन्तु भवादृश्या गुणवत्याः पत्न्याः प्राप्त्यर्थं कृतैषा युक्तिः ।

रसज्ञा—येनाहं वञ्चिता, तमेव परिणेतुं नाहं शक्नोमि ।

निरञ्जनः—पूर्वं त्वयानुमतमेतद् । अथ च मया विना त्वं स्थातुमक्षमासीति यदुक्तं किं सर्वं तन्निरर्थकमेव ?

रसज्ञा—निरर्थक-तुल्यमेव ।

निरञ्जनः—अपि भवती दृढनिश्चया ?

रसज्ञा—दृढाऽस्मि ।

निरञ्जनः—तदहं गच्छामि ।

रसज्ञा—मुहूर्तं तिष्ठतु भवान् । भवन्तमहं किञ्चिद् वक्तुमिच्छामि ।

निरञ्जनः—वदतु भवती यथेच्छम् ।

रसज्ञा—मम निश्चय एकं कारणमस्ति । अहमपि भवत्सदृशयुक्ति-पूर्वकागतो रसज्ञो नामा पुरुषोऽस्मि ।

निरञ्जनः—किं श्रूयते मया । अप्येतत्सत्यम् ?

रसज्ञः—सत्यमेवास्ति ।

निरञ्जनः—अत एव रश्मिकान्त, भवतो विचित्रता न महती ।

मेघोदयः

पि. एस्. सुब्बरामभट्टः

१

सूत्रधारः—हलेनाकृष्य यो निन्ये कालिन्दीं स्वान्तिकं प्रभुः ।
भूयात्स देवो भवतां भूयसे श्रेयसे सदा ॥ १ ॥

(नटीमाहूय) अद्यास्मिन् कालिदासमहोत्सवे कौण्डिन्येन सुब्बरामभट्टेन कृतं मेघोदयं नाम नवीनं खण्डरूपकमभिनेतव्यमिति जनैरादिश्यते ।

नटी—कथमेतस्मिन्नवसरे मेघोदयम् अभिनीतं द्रष्टुमभिलाषोऽजनि जनानाम्?

सूत्रधारः—वर्षद्वयवृत्तामनावृष्टिमतिलंघ्य सुभिक्षतां नीतो जनपद इति विशेषतः सन्तुष्टैरत्रत्यैः प्रवर्तितोऽयमुत्सवः ।

नटी—युज्यते । निर्दिश्यतां तर्हि कर्तव्यम् ।

सूत्रधारः—सामाजिकानवहितान् कर्तुं केनापि गीतकेन समारब्धव्यम् इत्याहूतासि ।

नटी—(कर्णं दत्वा) मृदङ्गध्वनिः श्रूयते, तेनैवावहिता समग्रा संसदियम् ।

सूत्रधारः—तन्मन्ये, वेश्याङ्गनानां भूमिकां स्वीकृत्य मत्सहाया अरण्यं प्रविशन्तीति । त्वर्यताम् । अनन्तरा शबर्या भूमिका तवैवेति किं न स्मर्यते?

नटी—कथं विस्मरामि?

(निष्क्रान्तौ ।)

(वेश्याङ्गनाः प्रविश्य गायन्ति ।)

पुष्कलसुमफलपर्णै-
र्मधुकरविहगादिजीवजालानाम् ।
आतिथ्यं विदधाना
वनलक्ष्मीर्भाति धन्यगृहिणीव ॥ २ ॥

प्रथमा--चिरप्रवृत्तेन अतिप्रवृद्धेन अवग्रहेण कृषौ विनष्टायामस्माकं शालिगोपीवृत्तिर्विलुप्तेति न मे विषादः । राज्ञा लोमपादेन वयं गर्हितामिमां वेश्यावृत्तिं परिग्राहिता इति खिन्नं मे मनः ।

द्वितीया--मैवं भण । कार्यार्थं खल्वियं वृत्तिरस्माभिः स्वीकृता । यदि तत्कार्यं साध्यते तर्हि श्लाघ्यैव स्यादस्माकमियं प्रवृत्तिः । न ह्येतावता वारनारीवृत्तिः कृषीवलकन्यकानां कुलधर्मो भविष्यति । अनावृष्टिप्लुष्टस्याङ्गदेशस्य क्षेममाधातुमस्माभिरप्यवश्यं प्रयतितव्यम् ।

तृतीया--नाहमत्र कमपि दोषमुत्पश्यामि । किं तु विभाण्डकस्य मुनेः कोपो मां वेपयति ।

प्रथमा--(परितो विलोक्य)--इदमेव तत्तपोवनमिति प्रतिभाति । परं तु तस्याश्रमः कुत्रेति स्पष्टं न लक्ष्यते । वनपुष्पाणीमानि चित्तमावर्जयन्ति । कानिचिदवचित्य मालां ग्रथ्नीमः । (गायति ।)

निर्मलनिर्झररम्यं
कुसुमितकासारशोभि विपिनमिदम् ।
मुनिजनमानससदृशं
विलसति विमलाशयैर्जुष्टम् ॥ ३ ॥

द्वितीया—तूष्णीं तिष्ठ । कापि वनचरी इत एवागच्छति ।

शबरी—(प्रविश्य) का यूयं मुग्धा इव महर्षेः प्रभावमज्ञात्वा तदाश्रमस्य समीपे कोलाहलेन खेलथ ?

द्वितीया—स तपोधनो नारीजनपराङ्मुख इति श्रुतमस्माभिः । तस्यैवाश्रममन्विष्यामो वयम् । कथय, कीदृशस्तस्य प्रभावः ?

शबरी—शृणुत, काचन सुन्दरी कौतुकात्तस्य तपोनिष्ठां परीक्षितुकामा तत्पर्णशालाभ्यर्णभूमौ क्रीडति स्म । तस्या विलासैराकृष्टः स तया सह

कतिपयानि दिनानि रेमे। ततस्तामाहितगर्भामवलोक्य तपोलोपेन कुपितः, मृगी भवेति तां शशाप। शापमोक्षाय तया प्रार्थितश्च, यावत्प्रसवसमयं मे शाप इति चावदत्।

सर्वाः—मन्यामहे, तस्यास्तनूजोऽयं ऋश्यशृङ्ग इति।

शबरी—अथ किम्। शापान्ते च सा पुत्रमाश्रमे विसृज्य तिरोहिता।

सर्वाः—का वाभवत्सा सुन्दरी?

शबरी—कापि स्वर्वेश्येति कथयन्ति। कस्तत्त्वं वेत्ति? ततो निर्विण्णेन मुनिना प्रतिषिद्धा वनवासिन्योऽपि स्त्रियो नाश्रमोपकण्ठमुपसर्पन्ति। अतश्च अदृष्टनारीरूपोऽयं कुमारः।

प्रथमा—तमेव मुनिपुत्रं द्रष्टुमागता वयम्। किन्तु मुनेस्तपो विहन्तुं न यतामहे।

शबरी—अप्रमत्ताश्चरत। मा तावन्मुनेर्नयनपथे पतत। मन्ये, युष्माकं गीतं श्रुत्वा इत एवायाति कुमारः। नात्र मया स्थातव्यम्।

(निष्क्रान्ता शबरी।)

द्वितीया—शबर्या कथितेन वृत्तान्तेन किञ्चिदाश्वस्तं मे चित्तम्। विभाण्डकस्तादृशो न प्रतिभाति, यादृशममुं प्राकृतो लोको मन्यते। न खलु निसर्गतोऽयं नारीशत्रुः।

प्रथमा—शापवार्तेयं तथ्येति तस्य नारीद्वेषः स्पष्टयति। किन्तु कुमारस्य जननी कापि मानुषी भवेदिति संभावयामि।

द्वितीया—मृगीपुत्र इति लोके व्यवहारः। शापवृत्तान्तं तु को वेद?

प्रथमा—वयमत्र तरुतले नृत्यामः। तत्कुमारं त्वरितमाकर्षेत्।

(गायन्ति नृत्यन्ति च।)

भुजबलदर्पाध्मातो
मृगपतिमृगयाकुतूहलाविष्टः ।
महति वने बहु विचरन्
शबरसुतानयनपञ्जरे पतितः ॥ ४ ॥

(ऋश्यशृङ्गः समीपमुपसृत्य सकुतुकं विलोकयति ।)

निखिलसुखनिदानं गोधनं श्रीनिधानं,
परिचरणविदग्धं सच्चरित्रं कलत्रम् ।
विपुलधनसमृद्धिः पुष्कला धान्यसम्पत् ,
सुकृतिसुलभमीदृग्जीवितं कर्षकाणाम् ॥ ५ ॥

ऋश्यशृङ्गः—के वा यूयम्? किमर्थमत्रागताः?

प्रथमा—विभाण्डकस्य मुनेस्तनयं द्रष्टुमागता वयम्?

द्वितीया—तस्य तपोमहिमा विदूरेष्वपि देशेषु श्रूयते ।

ऋश्यशृङ्गः—अहमेव स विभाण्डकपुत्रो नाम्ना ऋश्यशृङ्गः ।

प्रथमा—दिष्ट्या दृष्टस्त्वम् ।

ऋश्यशृङ्गः—किमिदं पठ्यते युष्माभिः?

प्रथमा—कुमारक, किं त्वया वेदो नाधीतः?

ऋश्यशृङ्गः—चत्वारोऽपि वेदाः साकल्येनाधीताः ।

प्रथमा—यद्वेदे श्रूयते तदेवास्माभिर्गीयते ।

ऋश्यशृङ्गः—कथमेतत्?

द्वितीया—'कृषिं कुरु । तत्र वित्तं गावो जाया च लभ्यन्ते । तैः सुखं जीव । बहुमानस्य पात्रं भव' इति वेदः प्राह । तदेवास्माभिर्गीतम् ।

ऋश्यशृङ्गः—स्मर्यते सा ऋक् यस्यामयमर्थः प्रोक्तः । किमिदं जायेति?

प्रथमा—यद्यस्माभिः साकमागमिष्यसि तर्हि नूनं ज्ञास्यसि किं जायेति ।

ऋश्यशृङ्गः—मम पिता वेदस्यार्थं न पाठितवान् ?

प्रथमा—वेदार्थज्ञानं लोकविज्ञानादेव सिध्यति इति वदन्ति ।

ऋश्यशृङ्गः—कुत्रत्या यूयम् ?

प्रथमा—वयमङ्गदेशादागताः ।

ऋश्यशृङ्गः—अत्रत्यास्तापसा एव मया दृष्टाः; न कदापि युष्मादृशाः । आश्रमादन्यत्र गन्तुं मे जनको नानुमन्यते । तिष्ठतु तावदेतत् । अद्य मम पिता आश्रमे न वर्तते । समीप एव चास्माकमाश्रमः । मया सह यूयमप्यागच्छत ।

सर्वाः—यथा ते रोचते । (परिक्रम्य आश्रमं प्रविश्य)

ऋश्यशृङ्गः—अयमतिथिसत्काराय परिकल्पित उटजः । अत्र दर्भास्तरणेषु सुखमुपविशत । फलादीन्यानयामि ।

(उटजान्तरं प्रविष्टः ।)

प्रथमा—अहो सरलतास्य! नायं स्त्रीपुंसभेदमपि जानाति । नाहमनृत-वचनैस्तं वञ्चयितुमुत्सहे ।

द्वितीया—गरिष्ठं किल कार्यमस्मान् प्रेरयति । येन केनाप्युपायेन तत्साधयितव्यम् ।

प्रथमा—हन्त । ग्रामीणानामारण्यकानां च तुल्यरूपा वसतिः ।

वल्लीपिनद्धवंशैः
काशादितृणैश्च निर्मितच्छदयः ।
उटजेभ्यो भिद्यन्ते
ग्राम्यकुटीरास्तु केवलं नाम्ना ॥ ६ ॥

ऋश्यशृङ्गः—(प्रविश्य) इमानि फलानि मूलानि च यथेष्टं भुज्यन्ताम् ।

द्वितीया—अस्माभिरप्यानीतानि फलानि । तानि त्वमपि भक्षय ।

(कण्डोलकात् मोदकान्यादाय प्रयच्छति ।)

(सर्वे भक्षयन्ति ।)

तृतीया—कुत्र गतस्ते पिता ? कदा वागच्छेत् ?

ऋश्यशृङ्गः—नातिदूरे कुत्रचिदाश्रमे यागः प्रवर्तते । तदर्थं गतः । यागं परिसमाप्यैव प्रत्यागमिष्यति । अतीव स्वादु वः फलम् । ईदृशं फलं मया नास्वादितपूर्वम् ।

द्वितीया—अस्मद्देशे सुलभमेतत् । एहि, गच्छामः । तत्र यथेप्सितं लभ्यते ।

ऋश्यशृङ्गः—(सकुतूहलं निर्वर्ण्य) युष्मद्दर्शनं मे मनः प्रीणयति । युष्माकं पुष्पमाला, तिलकं, वल्कलं, सर्वमपि मनोहरं लक्ष्यते । एतानि धारयितुमीहते मे मनः ।

प्रथमा—सर्वं दास्यामः । त्वया दत्तानि फलान्यपि स्वादून्येव । अस्मद्देशे संप्रति वृष्टेरभावात्तानि दुर्लभानि ।

ऋश्यशृङ्गः—यथेच्छमानीय दास्यामि । (गच्छति ।)

प्रथमा—सख्यौ, असौ तपस्वी अङ्गनास्पर्शसुखं न वेत्ति । क उपायस्तद्वेदयितुम् ?

द्वितीया—अहं तस्य ललाटे तिलकं विधास्ये । त्वं तस्य जटिलं केशपाशं कुसुमैरलङ्कुरु ।

प्रथमा—उचित उपायः ।

ऋश्यशृङ्गः—(प्रविश्य) एतानि फलानि । मया पुष्पाण्यपि समानीतानि । एतैः कामपि मालां कृत्वा मह्यं देहि ।

तृतीया—(जनान्तिकम्) कण्डोलकान्मोदकानि बहिरादाय फलैस्तं पूरयामि ।

(तथा करोति ।)

प्रथमाद्वितीये—कुमारक, इतस्तिष्ठ । तव ललाटे तिलकं विधीयते, जटायां पुष्पाभरणं च विन्यस्यते । (तथा कुरुतः ।)

ऋश्यशृङ्गः—कुसुमकोमलानि वोऽङ्गानि । युष्माभिः सह नर्तनं कर्तुमपि मे मनः स्पृहयति ।

प्रथमा—आगच्छ, गृहाण नो हस्तम् । (गायन्ति नृत्यन्ति च ।)

प्रचलति सरसिजसुरभिलपवने
विहरति कुसुमितविटपिषु मधुपे ।
प्रवहति परभृतकुलकलनिनदे
प्रविशति युवहृदि विहरणकुतुकम् ॥ ७ ॥

(प्रविश्य)

शबरबालकः—अये, तटाकतीरे तिष्ठन्तः केचित् युष्मानाह्वयन्ति । त्वरया गन्तव्यम् ।

सर्वाः—सखे ऋश्यशृङ्ग! अतिक्रामति गमनवेला । त्वामप्यस्मद्देशं नेतुमिच्छामः । श्वः परश्वो वा आगमिष्यामः ।

(निष्क्रान्ताः)

२

(वेश्याङ्गनाः प्रविशन्ति ।)

प्रथमा—इदमेव तत्फुल्लपङ्कजरमणीयं पल्वलं यस्य तीरे अस्मत्सहायपुरुषाः प्रपूर्वेद्युरतिष्ठन् । अद्यापि अत्रैव ते तिष्ठन्तु । गृहाण कण्डोलकं, वयमाश्रमं व्रजामः ।

द्वितीया—(दूरतो विलोक्य) कोऽसौ तिष्ठति तरुतले अस्मदागमनं प्रतीक्षमाण इवेतो दत्तदृष्टिः ?

प्रथमा—स तरुणतापस एवेति मन्ये । तेनोत्कण्ठितेन भवितव्यमिति तर्कयामि । तादृशः खलु पुलकाङ्कुरस्तस्य गात्रेऽलक्ष्यत, यदा त्वया तस्य विशाले फालतले तिलकं रचितम; मया च माला पिनद्धा ।

द्वितीया—त्वमप्युत्कण्ठितेव भाषसे । तादृशानां विकाराणामभूमिरसौ तापसः । तथाविध एव स नेतव्यः । अन्यथा परिहीयेतास्य प्रयतता । कार्यसिद्धिश्च विहन्येत ।

प्रथमा—त्वमेवास्माकं पुरःसरा भव । नाहं त्वमिव दक्षा ईदृशेषु कृत्येषु ।

(परिक्रामन्ति ।)

(प्रविश्य उपसरन्)

ऋश्यशृङ्गः—युष्माकमागमनमेव प्रतिपालयामि । कण्डोलको मम हस्ते दीयताम् । आश्रमं गच्छामः । (परिक्रामन्ति ।)

प्रथमा—अये, मे पादतले कण्टकः संलग्नः । (तिष्ठति ।)

ऋश्यशृङ्गः—(उपसृत्य) मे स्कन्धमवलम्ब्य पादमुत्क्षिप । उद्धरामि कण्टकम् । (तथा कृत्वा) स्मर्यते मया ते गीतं यत्र वेदोक्ता कृषिप्रशंसा वर्ण्यते । वेदज्ञोऽसि ।

प्रथमा—शिक्षितमतयः प्रतिपद्यन्ते वेदार्थं, नेतरे । श्रूयतामिदम्—

वनभुवि जातस्यापि
प्रथिततरं चन्दनस्य सौरभ्यम् ।
जानपदैरुपभुक्तं
घ्राणपथं नैति शबराणाम् ॥ ८ ॥

ऋश्यशृङ्गः—मयापि नानुभूतं तत् ।

प्रथमा—अद्य त्वयापि तदनुभूतं भविष्यति ।

(आश्रमं प्रविशन्ति ।)

ऋश्यशृङ्गः—अग्निरक्षणे अतिथिपूजने च नियुक्तोऽहमाश्रमं त्यक्तुं न शक्नोमि । पितुरागमनानन्तरं युष्मद्देशदर्शनाय मे अवसरो लभ्येत ।

द्वितीया—प्रत्यागते तव पितरि न वयमत्रागमिष्यामः । तस्य कोपाद्भीता वयम् ।

ऋश्यशृङ्गः—किमर्थमतिथिभ्यः कुप्यति तातः? यागार्थं अत्रत्यानि फलादीनि नेतुं पित्रा नियुक्तस्तापसकुमारः प्रत्यहमत्रायाति । तन्मुखाद्युष्मदागमनवार्तां मया सन्दिष्टामवगम्य ह्यः सायं तातेनादिष्टोऽस्मि—दुर्भिक्षपीडितादङ्गदेशादतिथयो यद्यायान्ति तर्हि फलादीनि दीयन्ताम् । न तैः संभाषणं कर्तव्यम् इति । अस्त्वेतत् । क्षणं विश्रम्यताम् । फलान्यानयामि । (गच्छति ।)

तृतीया—वेपते मे हृदयम् । त्वरितमितो गच्छेम । न वयं विभाण्डकस्य कोपाग्निना दग्धा भवेम ।

प्रथमा—अथवा तस्य शापेन हरिण्यो न भवेमेति भण । तापसानामपि कुमाराः सन्तीति किलोच्यते । समाश्वस्ता भव । कुपितं मुनिमहमनुनेष्यामि ।

द्वितीया—राजाज्ञया गुरुजनैर्नियुक्ता वयम् । कर्तव्यमनिर्वर्त्य कथं निवर्तामहे? नेममद्य नेतुं शक्यते । पितुः प्रत्यागमनात्प्रागेव तमितो नेतुमुपायश्चिन्त्यताम् ।

प्रथमा—यं कमप्युपायमाश्रित्य तस्य वशीकरणं न मे रोचते । संभावनार्हः खलु तस्य तपोमहिमा ।

(प्रविश्य)

ऋश्यशृङ्गः—इमानि फलानि सुतरां स्वादूनि । अद्य वनचरेण केनाप्युपहृतं किञ्चिन्मधु । वेदे बहुधा प्रशस्तं मध्विति वो विदितमेव ।

प्रथमा—आरण्यकाः खलु वेदप्रणेतारो महर्षयः । किं त्वस्माभिरानीतानि फलानि मधुनोऽपि मधुरतराणि ।

(सर्वे भक्षयन्ति ।)

द्वितीया—कदा वा प्रत्यागमिष्यति ते तातः?

ऋश्यशृङ्गः—परश्वः सायमिति मन्ये ।

द्वितीया—तर्हि परश्वो मध्याह्ने सकृदपि वयमागमिष्यामः । परं तु आश्रमं न प्रवेक्ष्यामः । तस्यैव तटाकस्य तीरे स्थास्यामः ।

प्रथमा— अग्निरक्षणार्थं च मुनिः सायमागतो भवेत् ।

द्वितीया—एकमेव दिनमस्माकं पर्णशालासु सुखमुषित्वा प्रत्यागन्तुं शक्यते । मध्याह्न एवास्माननुगन्तुं यतस्व ।

तृतीया—अनापृच्छय मां गत इति यदि तातस्ते कुप्यति ।

प्रथमा—अस्माभिरानीतानामेतेषां फलानां भक्षणेन शममेष्यति ।

(हसति—मञ्जुलेन हासेनावर्जितो मुनिपुत्रः सकौतुकं पश्यति ।)

ऋश्यशृङ्गः—(भक्षणं समाप्य) अद्यापि नर्तनं कर्तुमभिलष्यते ।

प्रथमा—साधु । प्रथमं चन्दनं ददामि । पश्चात् नृत्यामः ।

(कुमारस्य चन्दनानुलेपनं कुर्वन्ति ।)

ऋश्यशृङ्गः—त्वदङ्गमिव सुखस्पर्शमिदं चन्दनम् ।

प्रथमा—अस्माननुगायन् नृत्यतु—

असुलभबहुविधविभवमपि गृहं
सुखयति सविनयमधुमयभणितिः ।
कनकमणिरहितमपि मनुजवपुः
विलसति विकसिततरुणिमसुभगम्* ॥ ९ ॥

ग्रीष्ममण्डूकवत्कर्शितस्तापसः
सेवते पावकं रिक्तभक्ताशनः ।
आतिथेयो मुनिः प्रीणयत्यागतान्
भेकवत्प्रावृषि व्याहरन् स्वागतम् ॥ १० ॥

ऋश्यशृङ्गः—सखे, वेदवर्णितां मण्डूककथां स्मारयतीव ते द्वितीयं गीतम् ।

प्रथमा—साधु विदितम् । अभिज्ञोऽसि । शृणु तावत्—

अवग्रहाभितप्तानामङ्गदेशनिवासिनाम् ।
ग्रीष्मभेकदशा सैव दृष्टा कष्टतराधुना ॥ ११ ॥

ऋश्यशृङ्गः—तर्हि भूयोऽपि वृष्टिलाभे सुखं जायेत ।

प्रथमा—यदि दैवमनुकूलं भवेत् ।

द्वितीया—गृह्यतामिदं फलसहितं भाजनम् । परश्वो मध्याह्ने तटाकतीरे त्वदागमनं प्रतिपालयिष्यामः । नियतमागच्छ । त्वत्कृते अस्मदीयमिव वल्कलमप्यानेष्यामः । स्वस्ति भवतु ते ।

(निष्क्रान्ताः ।)

---

* शशिकला छन्दः

३

(वेश्याङ्गनाः प्रविशन्ति ।)

द्वितीया—नभसो मध्यमारोहति रविः । इदमेव तत्स्थानम् । वयमत्रैव तिष्ठामः । अस्मत्सहायपुरुषा वृक्षान्तरितास्तिष्ठन्तु । अन्यथा तस्य शङ्का जायेत । यदि तस्यागमनमनन्तरायं भवेत्तर्हि स एवास्माकं सहायः स्यात् । नाहमीदृशं बलिष्ठं युवानं कदाप्यपश्यम् ।

प्रथमा—न केवलं बलिष्ठः । अतीव तेजस्वी च । अस्मत्सहवासाय स्पृहयति चासौ । विलासानामनभिज्ञोऽपि, अनाशङ्कमानः, सोऽस्माकं चेष्टासु सकौतुकं दत्तदृष्टिः । नाहमीदृशीं तपस्सम्पदं दूषयितुमिच्छामि यद्यङ्गदेशस्य तादृशी विपन्मां न प्रचोदयति । प्रशंसार्हा च तस्य प्रशान्तता । कथमियान् भेदः पितुः पुत्रस्य च ?

(गायति)

हरिणविहारमनोज्ञं
श्वापदसञ्चारभीषणं च वनम् ।
शमनिलयं मुनिहृदयं
रागद्वेषादिसङ्कुलं मन्ये ॥ १२ ॥

तृतीया—हन्त ! भाग्यपरिपाकः, दिष्ट्या स आगच्छति ।

प्रथमा—न जाने, अनृतभीरुरसौ कं वा पितुर्निदेशमद्य लब्धवानिति । तस्य जनको न जानाति सिंहशावकं चिराय गुहायां निरोद्धुं न शक्यत इति ।

(प्रविश्य)

ऋश्यशृङ्गः—सखायः, अद्य प्रातरेव प्रत्यायातस्तातः । किञ्चित्कुपित इव लक्ष्यते । कारणं तु न ब्रूते । नापि मया ज्ञायते । अङ्गदेशस्य

राजा लोमपादः चम्पानगर्यां वसतीति, तत्रत्या नरा नास्मादृशाः, तेषां संसर्गो महान्तं दोषं जनयेदिति च तेनोक्तम् ।

प्रथमा—सखे, न वयं चम्पानगरीत आगताः । अङ्गदेशस्य उत्तरस्यां सीमनि वसामः । नागरिकाणां वृत्तिरस्मभ्यमपि न रोचते । अस्माकमुटजा अपि तृणैः पर्णैश्च निर्मिताः, न पुनश्चम्पानिवासिनां गृहाणीव । त्वमेवागत्य पश्य । अस्माकं संसर्गे को वा दोषो दृष्टस्त्वया ?

ऋश्यशृङ्गः—एतावता न कोऽपि दोषो दृष्टः । एतत्सर्वं मया निवेदितम् । मया दत्तमपि त्वदीयं फलं स नाभक्षयत्, नाप्यस्पृशत् । फलभाजनं च दूरतः क्षिप्तम् ।

द्वितीया—यद्येवं तर्हि अस्माननुगन्तुं तातस्त्वां नानुमन्येत ।

ऋश्यशृङ्गः—तदपि मया प्रस्तुतम् । सा वार्तैव तस्मै नारोचत । युष्मत्संलापो मां मलिनयेदिति स मन्यते । तपसश्च मे महानन्तरायो भवितेति वदति । वात्सल्येन मे न कुप्यति ।

द्वितीया—अद्य वयमत्रागता इति किं तातो जानाति ?

ऋश्यशृङ्गः—न निवेदितं मया ।

प्रथमा—कुमारक, न वयं तव पितरं कोपयितुमागताः । दिदृक्षया केवलं प्रथममागताः । इदानीं त्वमस्माकं सखा संवृत्तः । अतोऽहं प्रणयेन ब्रवीमि, यदि रोचते तर्ह्यस्माभिः साकमद्यैवागम्यताम् । तत्र महानतिथिसत्कारस्ते भविष्यति । एकां रात्रिं तत्र सुखमुषित्वा श्वः सायाह्नात्पूर्वमेव प्रत्यागम्यताम् । तावता नापराधः कृतो भवेत्, त्वया वास्माभिर्वा ।

ऋश्यशृङ्गः—आश्रमकृत्येषु मम साहाय्यं कर्तुमन्यो मुनिकुमारस्तातेनाद्य प्रातः समानीतः । समिदाहरणाय मया सह बहिः प्रस्थितोऽसौ ।

मद्गमनवार्तां पित्रे निवेदयितुं तमादिश्य सत्वरमागच्छामि । क्षणमत्रैव तिष्ठत । (गतः ।)

द्वितीया—अहो पितृभक्तिः ! किन्तु, नेदृशीं भक्तिमर्हति स पितेति मे मतिः ।

प्रथमा—बलवदाकृष्टं तस्य चित्तम् । तस्य चातुर्यं मां तोषयति । अस्माकं क्लेशस्य फलं तु देवो वेद ।

द्वितीया—एकतोऽङ्गदेशस्य क्षेममाधातुं, अन्यतो मुनिपुत्रं तपसो भ्रंशयितुं चायमुद्यम इति दोलायते मे मनः ।

तृतीया—पुत्रस्यागमनेन समं पितुः शापोऽप्यस्माननुधावेदिति बिभेति मे हृदयम् ।

प्रथमा—अनापृच्छय गच्छति पुत्रे प्रथमं पततु स शापः ।

(प्रविश्य)

ऋश्यशृङ्गः—सायन्तने होमकर्मणि मामनुपस्थितमालोक्य पृच्छति पितरि, मद्गमनवार्तां निवेदयेति सखायमादिश्य समागतोऽस्मि । त्वरितं प्रतिष्ठामहे ।

प्रथमा—साधु कृतं सखे । अस्मद्देशीयमेतद्वल्कलं धार्यताम् । (कोशैयं यच्छति ।)

(गायति ।)

चिरपरिचितमुज्झित्वा
नीडनिवासं शुको बहिर्डयते ।
संद्रष्टुं वनशोभां
वियति विशाले विहर्तुं च ॥ १३ ॥

(प्रस्थिताः ।)

४

(कर्षकाः प्रविशन्ति ।)

एकः—अनावृष्टौ राष्ट्रे भवति नृपनीतेः क्षतिवशात्
प्रजानां वा धर्मस्थितिविपरिणामेन महता ।
परीहारस्तस्याः प्रयतमुनिवर्यस्य पदयोः
पवित्रः स्पर्शः स्यादिति कथितमार्यैर्मुनिजनैः ॥ १४ ॥

अतो मुनिजनोपदेशेन मन्त्रिणा पुरोहितेन च सहालोच्य दैवादापतितस्यावग्रहस्य परिहाराय विभाण्डकस्य मुनेः सुतो महातपस्वी अदृष्टराष्ट्रनगरवासिनरनारीजनः कथञ्चिदत्रानेतव्य इति निश्चितवान् महाराजो लोमपादः । तदर्थमुपायान्तरमपश्यद्भिर्मुनिभिः येन केनापि प्रकारेण तं प्रलोभ्य समानेतुं वेश्याङ्गनाः प्रेष्यन्तामिति चोपदिष्टम् । मुनिशापभयेन कातरासु वेश्यासु, देशस्य क्षेममाधातुं व्यवसिताः कृषीवलकन्यका वारनारीवेषं परिगृह्य मुनिपुत्रानयनार्थं वनं प्रस्थिताः । इतो गतानां तासामद्य कतिचन दिनान्यतीतानि । अद्यापि दिवाकरोऽस्तमितप्रायो दृश्यते ।

अन्यः—जानपदेभ्यो वन्यवस्तून्याहरन्ती काचन शबरी रहसि तासां प्रवृत्तिमन्विष्यन्ती स्वयमागत्य कथयति, उद्यमोऽयमविलम्बेन सफलः स्यादिति ।

अपरः—वने चरन्त्याः शबर्या अप्यत्र तादृशी श्रद्धा! अथवा, दशायामस्यां देशक्षेमस्य कृते को वा न श्रद्धधीत?

इतरः—प्रासाद इव कुटीरोऽपि बाधितोऽवग्रहेण । न केवलं फलमूलादिकं, किन्तु तृणमपि दुर्लभमेव । न जाने, कथमस्माकं नष्टावशिष्टाश्चतुष्पादः शरीरं धारयन्तीति । शबर्या वार्ता कमप्याश्वासं जनयति । तस्या वचनं सूनृतं भवतु ।

(प्रविश्य)

ग्रामीणाः—आश्चर्यं, आश्चर्यं! पश्यत पश्यत मेघमालां सपदि नभस्युदिताम् ।

(सर्वे अम्बरतलमुद्वीक्षन्ते ।)

ग्रामीणो राजवन्दी—

नभसि वितता विष्वग्व्याप्ता बलाहकसंहतिः
स्तनितमुखरा श्रेणीभूता तडिद्भिरलङ्कृता ।
पवनचलिता धारासारैर्धरामभिषिञ्चति
न्यधित चरणं मन्येऽङ्गेषु स्वयं हरिणीसुतः ॥ १५ ॥

वृद्धकर्षकः—(आकर्ण्य) अये, तादृशं तच्चरणमभिवादनेन संभावयितुमभिलषामि । कतमस्मिन् प्रदेशे स आगतः स्यात्?

तरुणकर्षकः—इत उत्तरस्यां दिशि हिमाचलगामिनि मार्गे विभाण्डकस्याश्रमः । तस्यां सीमनि शबरवाटो नाम वनप्रायो ग्रामः, यत्र लोमपादस्य राज्ञो धर्मोपदेष्टा स्कन्दरातो मुनिर्वसति । स एव ग्रामः तस्य पादस्पर्शं प्रथमं लभते ।

वृद्धकर्षकः—धन्यतम एवाङ्गेषु स ग्रामः । अये, इत आगच्छत्यस्माकं शालिगोपी वेश्यावेषं धारयन्ती ।

शालिगोपी—(प्रविश्य) फलितमस्माकं भागधेयम् । वृष्ट्या सहैवाङ्गदेशं प्रविष्टः स मुनिपुत्रः स्कन्दरातस्य मुनेराश्रमे वर्तते । अस्मद्देशातिथिं तमद्य स्कन्दरातः सत्करोति । श्वः प्रभाते जनानां दर्शनावसरो दीयेत ।

(शिशवः सहस्ततालं नृत्यन्ति ।)

पश्यत पश्यत वारिदमालाः
क्रीडत नृत्यत गायत बालाः ।
वर्षति कर्षक जागृहि, फाला-
नाहर हालिक, धावति वेला ॥ १६ ॥

द्यौरिह वर्षति, लाङ्गलदीर्णा
भूरपि पुष्यति गोमयकीर्णा ।
अम्बरमम्बुदडम्बरलीलं
पश्यत सम्प्रति वार्षिककालम् ॥ १७ ॥

(शालिगोपी उपगायति ।)

शाद्वललोलुपगोवृषजालं
शालियवादिकृषेरनुकूलम् ।
पश्यत शंसत वार्षिककालं
कर्षकलोकमहोत्सवखेलम् * ॥ १८ ॥

(निष्क्रान्ताः ।)

५

(ऋश्यशृङ्गः स्कन्दरातश्च आश्रमस्य बहिर्वेदिकायामुपविष्टौ ।)

(नेपथ्ये)

प्रत्यूष एव समनुष्ठितनित्यकृत्यं
वैभाण्डकिं मुनिमवेक्षितुमागतानाम् ।
वर्षागमादमितमोदजुषां जनानां
हर्षारवैर्मुखरितोटजभूमिरेषा ॥ १९ ॥

कृषीवलकन्यकाः—(प्रविश्य)

विपदि पतितमङ्गराज्यमेत-
त्सपदि समुद्धृतमश्रमेण येन ।
जयति स मुनिवृन्दगीतकीर्ति-
र्जगति पवित्रपदोऽयमृश्यशृङ्गः ॥ २० ॥

---

* दोधकं छन्दः ।

स्कन्दरातः--आयुष्मत्यः, अतीतायां रात्रौ आवयोर्मिथः सुदीर्घं संभाषणं समवर्तत । सर्वोऽपि वृत्तान्तो मया सविस्तरं श्रावितः । न केवलं युष्मासु प्रसन्नोऽयं मुनिकुमारः, किन्तु प्रणयवानपि ।

सर्वाः--अनुगृहीता वयम् ।

स्कन्दरातः--ऋश्यशृङ्ग ! अध्वश्रान्ता इति ह्यः सायमेता विश्रमाय मया विसृष्टाः । भवन्तमभिवादयितुं क्षमापयितुं च त्वरमाणाः प्रातस्तरामागताः ।

ऋश्यशृङ्गः—न तावदेताभिः कोऽप्यपराधः कृतो मे । नाप्यस्ति मे कोपः । मम तातपादेन वेदा अध्यापिताः; एताभिः सखीभिश्च मे लोकः प्रदर्शितः ।

प्रथमा--सानुशयेयं दासी भगवन्तमभिवादयते । (प्रणमति ।)

ऋश्यशृङ्गः—आयुष्मती भव । किं ते नाम ?

प्रथमा—गोदा इति ।

ऋश्यशृङ्गः—महर्षे, स्त्रीणां नामानि श्रुतानि मया, यद्यपि स्त्रियो न दृष्टपूर्वाः । मया त्वस्या नाम प्रागेव न पृष्टम् ।

स्कन्दरातः—मन्ये, इतः पूर्वं तस्य नावसरः समजनि । कृते त्वभिवादने नाम प्रष्टव्यं किल भवति । इयं गोदा वैश्यवरस्य विदुषो राजवन्दिनस्तनया । शिक्षितापि शालिगोपीवृत्तावभिनिविष्टा ।

द्वितीया—इयमपि किङ्करी आर्या नाम भगवच्चरणयोः प्रणमति ।

तृतीया--भद्रानाम्नी इयमपि भगवत्पादयोः पतति ।

स्कन्दरातः--उभे अपि कृषीवलकन्यके । कुमारक, परित्यक्तभूमिकानामिव नटीनामेतासां प्रत्यभिज्ञानं न सुशकं स्याद्भवतः, यद्यहमत्र न संनिहितः ।

आर्या—अहो! नर्मालापकुशलता भगवतः स्कन्दरातस्य ।

गोदा—भगवन् स्कन्दरात! अस्मद्राजपुत्री मङ्गलवार्तामेतामाकर्ण्य प्रत्यूष एव चम्पापुरीतः प्रस्थिता रथादवरुह्य वन्दनावसरं प्रतीक्षमाणा तिष्ठति ।

स्कन्दरातः—त्वरितं प्रवेश्यताम् ।

राजपुत्री—(प्रविश्य) शान्तानाम्नी अहमभिवादये ।

ऋश्यशृङ्गः—अभीष्ट श्रेयः सर्वं सम्पद्यताम् ।

राजपुत्री—भगवन् स्कन्दरात, मम तातपादो भगवन्तमस्मदातिथिं संभावयितुमद्य सायमागमिष्यतीति सप्रणाममावेदयति ।

ऋश्यशृङ्गः—स्वागतं भवतु महाराजस्य । (निष्क्रान्ता राजपुत्री ।)

गोदा—भगवन्तौ, अनुज्ञायतां, साधयामः पुनर्दर्शनाय ।

(गायति ।)

निजनीडाद्विभ्रष्टाः भीता व्याधस्य दृष्टिपाताच्च ।
मुनितनयस्योत्सङ्गे पतिताः शुकशाबकाः कृपणाः ॥ २१ ॥

(निष्क्रान्ताः ।)

६

(स्कन्दरातः, ऋश्यशृङ्गः, सपुरोहितो राजा च आश्रमवेदिकायामुपविष्टाः ।)

(नेपथ्ये)

सुमहितकुलवृत्तिं वृष्टयभावाद्विनष्टां
कृषिमृषिवरपुत्रानुग्रहात्प्राप्य भूयः ।
अहमहमिकया तं वन्दितुं सङ्गतानां
प्रसरति जयघोषो दिक्ष्वयं कर्षकाणाम् ॥ २२ ॥

स्कन्दरातः—मङ्गलमुपनतमङ्गदेशनिवासिनां महानुभावस्य ऋश्यशृङ्गस्यानुग्रहेण ।

लोमपादः—महतीयमभ्युपपत्तिरङ्गराजवंशस्यापि । आशास्महे चास्या अविच्छिन्नां प्रवृत्तिमितोऽपि । मुने स्कन्दरात, सर्वे विभाण्डकात्परित्रस्ताः, तत्सुते च प्रणयिनः । किमत्र विपर्यये कारणम्? उभयोरपि तपःप्रभावः समान एव ।

स्कन्दरातः—एको लोकं द्वेषेण रोषेण च वीक्षते, अन्यः प्रणयेन करुणया च पश्यति ।

लोमपादः—तपोधनानामप्यनभिगम्यः पिता; साधारणानामपि सुखोपगम्यः पुत्रः । एतादृशः पुत्रो नरजन्म धन्यं विधत्ते; मादृशानां पुत्रकामनामुद्दीपयति च ।

स्कन्दरातः—सखे लोमपाद! भवतः कुमारी परिणययोग्ये वयसि वर्तते । अयं मुनिकुमारश्च वरिष्ठो वरः । राजकन्यका मुनिभिः परिणीताश्च श्रूयन्ते । जामातापि पुत्रकल्प एवेति महाराजः स्वयं जानाति । प्राप्तकालं विधीयताम् ।

लोमपादः—ईदृशादुपप्लवाद्रक्षितमिदं राज्यम् ऋश्यशृङ्गस्य भवितुमर्हति । किंतु, अपुत्रस्य मे पुत्रिकायाः शान्तायाः पुत्रेण अङ्गराज्याधिकारिणा भवितव्यमिति सनातनो धर्मः । सोऽप्यनुसृतो भविष्यति, यदि मुनिकुमारोऽयं मत्पुत्रीं पत्नीत्वेनाङ्गीकृत्य तया सहात्रैव राजधानीमधिवसेत् ।

स्कन्दरातः—यन्ममाभीप्सितं तदेव महाराजेनाभिलष्यते । ऋश्यशृङ्गस्यानुमतौ न मे सन्देहः । विभाण्डकमनुनेतुं ऋश्यशृङ्ग एव प्रभवति ।

ऋश्यशृङ्गः—तातस्य पुत्रवात्सल्यमेतद्विषये भवतां साहाय्यमावहेदिति मन्ये ।

स्कन्दरातः—महाराज, तर्हि परिणयमहोत्सवाय संभाराः संभ्रियन्ताम् । विभाण्डकाय सर्वमिमं वृत्तान्तं सादरं निवेदयितुं तस्यानुमतिं सम्पादयितुं च सन्देशहरः प्रेष्यताम् । ऋश्यशृङ्गेण सह अहमपि राजधानीं प्रति प्रस्थास्ये ।

राजवन्दी—

प्लुष्टान् वृष्टेरभावात्सलिलविरहितान् स्वप्रभावेण भूयो-
ऽप्यङ्गान् गङ्गातरङ्गैरिव नवजलदैः पावयन् प्लावयित्वा ।
प्रेष्ठां प्राज्ञस्य राज्ञो दशरथसुहृदो लोमपादस्य पुत्रीं
शान्तां कान्तामुदारां परिणयति सतीमृश्यशृङ्गो महात्मा ॥ २३ ॥

अपरं च—

प्रच्छन्नं देवदेवं निगमनिवसतिं दर्शयन्ती त्रयीव
स्निग्धायै राजपुत्र्यै मुनितनयममुं दर्शयित्वा वराग्रयम् ।
तिस्रोऽप्येताः कृतार्थाः कृषकदुहितरः सादरां पार्थिवस्य
प्राप्य श्लाघां प्रथन्ते जनपदकुशलाधानविख्यातवृत्ताः ॥ २४ ॥

(ससखी गोदा प्रविशति ।)

गोदा—आश्रमोपान्ते वसन्ती अस्माकं परिचिता शबरी विभाण्डकसमादिष्टेन स्वदारकेण सह सद्यो वनादागता विज्ञापयति ह्यः सायं शिष्येण ऋश्यशृङ्गस्य अस्मदनुगमनवार्ता महर्षये निवेदिता । पश्चात्प्रणिधानमास्थाय सर्वं साक्षात्कृतं महर्षिणा । कार्यस्य गौरवं ज्ञात्वा स प्रशान्तकोपः प्रसन्नश्च नः प्रियमाशास्ते इति ।

लोमपादः—समाश्वस्तोऽस्मि । अनुगृहीतमस्मत्कुलं काश्यपेन महामुनिना ।

स्कन्दरातः—सर्वं मङ्गलं संवृत्तम् । यथानिश्चयमनुष्ठीयताम् ।

लोमपादः—यथा भवन्त उपदिशन्ति । श्वः प्रातरेव सपरिच्छदं स्यन्दनमत्र सन्निधापितं करोमि ।

गोदा—इयमस्माकमाशंसा—

स्वं स्वं धर्मं चरतु सकलः पार्थिवः कर्षको वा
सर्वो देशो विभवनिचयैः पुष्टिमाप्नोतु नित्यम् ।
वार्ता स्फीता भवतु जनताक्षेमकारिण्यविघ्ना
वृत्तिं स्वीयां सततमुदिताः शालिगोप्यो लभन्ताम् ॥ २५ ॥

(निष्क्रान्ताः सर्वे ।)

मनोबोधः - श्रीरामदासस्वामिविरचितः

अनु॰ विश्वनाथ केशव छत्रे

वैराग्यस्य उद्दीपनम्

मूलक्रमाङ्काः

९ मनः! पुष्यतां मा परार्थेऽभिलाषो, ह्यतिस्वार्थबुद्धिर्महापातकाय ।
फलं पापकृत्यस्य भोक्तव्यमेव, चिरेष्टं न चेल्लभ्यते, दुःखमुग्रम् ॥

१० अखण्डं मनो! रक्ष्यतां प्रेम रामे, विषादं विना प्राप्तदुःखं सहेत ।
सुखं मन्यतां तत्, तनोर्यत्तु दुःखं, विवेकेन च स्थीयतामात्मरूपे ॥

१२ मनः! सन्ततं चिन्तयेन्न स्वदुःखं, मनः! शोकचिन्ते त्यजेद् रे! सुदूरम् ।
विवेकेन संत्यज्यतां देहबुद्धिर्, विदेहेन रे! भुज्यतां मुक्तिसौख्यम् ॥

१४ तनुं कर्मभिर्लब्धवान् जीव एषः, परं सापनीता तु कालेन काले ।
महान्तोऽपि मृत्योः पथैव प्रयाता, असङ्ख्याश्च जाता मृताश्चापि मह्याम् ॥

१५ इयं मर्त्यभूमिर्मनः! सत्यदृष्ट्या, समस्ताश्च जीवा अहंतावदृप्ताः ।
चिरंजीव्यशेषं च ते मन्यमाना, अकस्मात् परित्यज्य सर्वं प्रयान्ति ॥

१६ अथैकं मृतं शोचतीह द्वितीयस्, तमन्वेत्यकस्मादहो! सोऽपि शोचन् ।
सुदुष्पूरलोभो मनःक्षुब्धतायै, स आप्नोति तस्मात् पुनर्जन्म जीवः ॥

१७ वृथैवोह्यते मानवेनेह चिन्ता, भवत्येव भावि ह्यकस्मात् समस्तम् ।
नरो भोगमाप्नोति कर्मानुरूपं, विषादं श्रयत्यल्पधीस्तद्वियोगात् ॥

१८ विना राममन्येन नाशा निधेया, न गेया च कीर्तिर्मनो! मानवस्य ।
स्तुतो यः पुराणैस्तथा वेदशास्त्रैः, स्तवात्तस्य सर्वे स्तुता गौरवार्हाः ॥

---

* मूलक्रमाङ्कश्लोकाः १-७, ११, १३, २८-३७, ४७-५६, ५७-७६ प्रकाशिताः संस्कृतप्रतिभायां सप्तमोन्मेषे, द्वितीये विलासे ।

१९ मनः! सर्वथा मा सखे! प्रोज्झ सत्यम्, असत्यं मनो! मा प्रतिष्ठापयस्व।
मनो! रे वदेत् सत्यवाचैव सत्यम्, असत्यं त्वसत्यं, मनः! संत्यजेत्तत् ॥

२० कियान् रे! ऽहह! क्लेशदो गर्भवासः, प्ररुद्धो मनः! पच्यते तत्र जीवः।
अधोवक्त्रजीवस्य दुःखं महत्तद्-मनो! मास्तु तादृक्षकृच्छ्रं पुनस्ते ॥

२१ मनो! मास्तु जन्मप्रसूर्वासना ते, न वा कामना द्रव्यदारादिकानाम्।
मनो! यातना दुःसहा गर्भवासे, मनो! भद्र! संमेलय द्राक् सरामम् ॥

२२ मनः! सज्जन! त्वं हितं मे कुरुष्व, दृढं राघवं धारयान्तः सदैव।
त्रिलोकाधिपोऽसौ हनूमत्प्रभुश्च, महाराज उद्धारकर्ता जनानाम् ॥

२३ मनो! ब्रूहि माऽन्यद् विना रामकीर्तिं, वृथा भाषणान्नास्ति रे! सौख्यलाभः।
हरत्येष तेऽनुक्षणं काल आयुस्-ततस्त्वां नु को मोचयेद् देहपाते? ॥

२४ विना राघवं किं वृथा क्लेशितव्यं? पृथग्लोकवत् किं वृथा जल्पितव्यम्?।
मनो! वाचि ते रामनामास्त्वखण्डं, न संबाधतां त्वामहन्ताघरूपा ॥

२५ मनो! भद्र! नोद्विज्यतां बोधनान्मे, कुतो रामलाभो भवेदन्यथा ते!।
अवश्यं समायाति दुःखं सुखान्ते, विनङ्क्ष्यत्यशेषं च काले समस्तम् ॥

२६ कृता भूरियत्ना वपूरक्षणार्थं, तदन्ते तु कालेन कालेऽपनीतम्।
भजानन्यभक्त्या रघुश्रेष्ठमेनं, त्यजाशेषचिन्तां च संसारजन्याम् ॥

२७ भवात् किं वृथा भीरुवद् रे! बिभेषि? त्यजाशेषभीतिं च धैर्यं श्रयस्व।
समर्थोऽन्तिके रक्षिता राम एष, उपेक्षेत न क्रोधतप्ते कृतान्ते ॥

(२८-३७ जहात्येष दासप्रियो नैव रामः। प्रकाशिताः पूर्वमेव।)

मनः! सज्जन! स्थीयतां रामरूपे!

३८ मनः! प्रार्थना मामिकेयं त्वदग्रे, सदा राममीक्षस्व साश्चर्यमेनम्।
अवज्ञायतां मा क्षणं बोध एषो, मनः! सज्जन! स्थीयतां रामरूपे ॥

३९ पुराणैश्च यो वर्ण्यते वेदशास्त्रैः, स्थिरं यस्य भक्त्या समाधानसौख्यम् ।
त्यजाशेषचाञ्चल्यदोषं तमाप्तुं, मनः! सज्जन! स्थीयतां रामरूपे ॥

४० मनः! प्राप्यते यत्र सौख्यं समस्तं, वसात्यादरात्तत्र रे! सावधानम् ।
विवेकेन दुष्कल्पना रे! निरस्य, मनः! सज्जन! स्थीयतां रामरूपे ॥

४१ भ्रमित्वा भृशं लप्स्यसे रे! न सौख्यं, श्रमा निष्फलास्ते, हितं नाल्पमात्रम् ।
विवेकेन रे! स्वान्तरं बोधयित्वा, मनः! सज्जन! स्थीयतां रामरूपे ॥

४२ अनेकैः श्रितं मार्गमेवावलम्ब्य, मनो! रामचन्द्रं वशं स्वं कुरुष्व ।
प्रसिद्धः स नाथो हि दैन्यार्दितानां, मनः! सज्जन! स्थीयतां रामरूपे ॥

४३ मनः! सज्जन! स्मर्यतामेकमात्रं, हितं प्राप्यतामात्मनीनं जनेषु ।
विना रामनाम्नो न रे! भाषितव्यं, निदिध्यासितव्यं सदा रामरूपम् ॥

४४ मनः! पालयेत् सर्वथान्यत्र मौनं, कथा वर्णयेद्राघवस्यादरेण ।
त्यजेद्धाम तद्, यद्भवेद् रामहीनं, सुखावाप्तये संश्रयेदप्यरण्यम् ॥

४५ समाधानभङ्गाय योऽनिष्टसङ्गो, यतोऽहन्तयाक्रम्यसे त्वं त्वकस्मात् ।
मतिः प्रेरिता येन रामं जहाति, रुचिर् हा! तदर्थं महत्येव लोके ॥

४६ क्षणो निर्गतो यो विना रामगानं, मनो व्यर्थमायुस्त्वया तेन नीतम् ।
वृथा स श्रमो, यो विना राघवं स्याद्, हितं शश्वदालक्षते नित्यदक्षः ॥

(४७-५६ सुधन्यः स दासोऽस्ति सर्वोत्तमस्य । प्रकाशिताः पूर्वमेव ।)

निष्कामभक्तिः वादविरोधिता च

५७ मनः! प्राप्यतां धन्यता रामनाम्ना, व्रतोपासनादीननुष्ठाय सम्यक् ।
उदासीनता तेऽस्तु साध्यं सदैव, ततो वृत्तिनिर्लेपतां भोक्ष्यसे त्वम् ॥

५८ मनो! वासना मास्तु भोगेषु ते, सा; ह्युदेत्यन्तरे पूर्वकर्मानुसारम् ।
सदा ध्यायतां काममुत्सार्य रामो! मनो मास्तु ते कल्पनालेशमात्रम् ॥

५९ मनः! कल्पना क्लृप्यते कोटिशस्तु, ततः सर्वथा लप्स्यसे रे! न रामम् ।
मनो! धारयन् काममत्यादरेण, नरो नाप्नुयात् प्रेम रामे कदापि ॥

६० मनः! कामधुक्, कल्पवृक्षः स रामः, स चिन्तामणिः सर्वसारो निधिश्च ।
कथं तं स्तुवीयाम्? हि यस्य प्रभुत्वं, जगच्छास्ति, किं तत्समानं यथार्थम्?

६१ स्थितः कल्पवृक्षस्य मूलेऽपि शोकं, वहन्नन्तरे प्रप्नुयाच्छोकमेव ।
सतां संगतौ यो वसंस्तत्त्ववादं, वृथा वर्धयेत्तस्य दैवे तु शोकः ॥

६२ निदिध्यासने खण्डिते त्वन्तरङ्गे, समुत्तिष्ठतः शोकसंतापदुष्टौ ।
सुखानन्द एत्यत्ययं भेदबुद्ध्या, विषादेन सन्निश्चयो नाशमेति ॥

६३ यथा कामधुक्-स्वामिना तक्रयाञ्चा, विवादस्तथात्मावबोधालसेन ।
करस्थं तु विस्मृत्य चिन्तामणिं यश्-चिनोति श्रमैः काचखण्डान् स मूढः ॥

६४ दृढो निश्चयः संभवेन्नातिमूढे, न कामातिसक्तस्य चित्ते च रामः ।
भवेच्चातिलुब्धोऽन्तरे क्षोभतप्तः, प्रसक्तश्च भोगे सदा दैन्ययुक्तः ॥

६५ मनो! मास्तु ते जीवनं भक्तिहीनं, सदैन्यं ; स दुःखी महान् योऽतिमूढः ।
मनः! सादरं धारय प्रेम रामे, न धामेच्छहेम्नोऽपि रे! रामशून्यम् ॥

६६ असारः स संसार उग्राधिपूर्णो, मनो! ऽन्विष्यतां हे सखे! सत्यमेतत् ।
कुतः सौख्यलाभो विषप्राशनेन! मनो! राघवध्यानसौख्ये रमस्व ॥

(६७-७६ प्रभाते प्रभुर्ध्यायतां रामचन्द्रः । प्रकाशिताः पूर्वमेव ।)

रामविश्वासः

७७ प्रजायेत निष्कामता रामकामात्, ततो जीवमात्रे प्रतीयेत रामः ।
गुणान् रामचन्द्रस्य सप्रेम गायन्, भवेद् द्वन्द्वमुक्तो नरः श्रद्दधानः ।

७८ न यो विश्वसित्यादराद्रामचन्द्रे, वराको नरः सर्वशः पीड्यतेऽसौ ॥
अनाश्रित्य ना मोक्षदं स्वामिनं तं, वृथा देहसंसारचिन्तां करोति ॥

७९ मनो! ऽन्तः परित्यज्य संसारचिन्तां, दृढं ध्यायतां पावनो रामचन्द्रः ।
भवः सत्य आभाति मिथ्याभ्रमेण, ततश्चात्मरूपस्मृतिर्लोपमेति ॥

८० दृढं धार्यतां स्वान्तरे श्रीहरिश्च, सुखं तीर्यतां दुस्तरोऽसौ भवाब्धिः ।
न संचिन्त्यतां स्वोदरं दुर्भरं तद्, मनो! हन्यतां निर्दयं मत्सरोऽसौ ॥

नामस्मरणम्

८१ मनो! नाम मा मत्सरेण त्यज त्वं, परं तज्जपाखण्डमत्यादरेण ।
समस्तेषु नामोत्तमं साधनेषु, तुलार्हं न किंचित् सखे! तेन लोके ॥

८२ तुलार्हं न नामापरं रामनाम्ना, परं नेत्यभिज्ञायते दुर्भगेण ।
स्वदाहोपशान्त्यै शिवस्तत् सिषेवे, कथं पामरेण त्वसेव्यं नरेण? ॥

८३ शिवश्चिन्तयन् दग्धकामोऽपि रामं, शिवायाः पुरस्तं स्तवीत्यादरेण ।
बहुज्ञानवैराग्यसामर्थ्ययुक्ते, त्वियानादरो, मर्त्यजीवे पुनः किम्? ॥

८४ महेशः स मूर्ध्नोह्यते विट्ठलेन*, स यं ध्यायति ज्ञायतेऽसौ न लोकैः ।
स्वयं शंकरः शान्तिमाप्नोत्यदाहात्, प्रमोक्तान्तकाले तु जीवस्य रामः ॥

---

* नरहरिनामा अतिकुशलः सुवर्णकारः पण्ढरपुरे न्यवसत् । केनापि श्रेष्ठिना समयपूर्तये श्रीविट्ठलमूर्तेः कृते कटिमेखलां विधातुं स प्रार्थितः । एकनिष्ठः शिवभक्तः स सुवर्णकारः शिवेतरं दैवतं द्रष्टुमपि नेच्छति इति तस्माद् विज्ञाय श्रेष्ठिना विट्ठलकटिपरिमाणं तस्मै दत्तम् । यथाकालं तेन कृतां मेखलां विट्ठलकटौ बद्धुं यावत् श्रेष्ठी यतते तावत् सा मनागधिका प्रतीता । ततस्तावत्परिमाणेन ऊना कारिता सा अपर्याप्ता, पुनर्विवर्धिता च अधिकैव अनुभूता! । अतः स्वकार्यसिद्धये श्रेष्ठिना नरहरिः सनिर्बन्धं सानुनयं च भूयः प्रार्थितः, पटावृतलोचनो मंदिरं गत्वा मूर्तिं यावत् कटिपरिमापनार्थं स्पृशति तावत् स्वकीयमेवाराध्यदैवतं तच्छिवलिङ्गमिति साश्चर्यमभिज्ञातवान् । सौत्सुक्यं शिवं द्रष्टुं तेन पटेऽपसारिते तु विट्ठलमूर्तिरेव पुरतः स्थिता तद्दृष्टिपथमागता! । पुनः पटावृतनेत्रो यावत् स पश्यति तावत् स्पर्शज्ञानेन तत् शिवलिङ्गमेवेति प्रतीतम् । सद्यो निरस्तद्वैतभावः स सुवर्णकारो झटिति दृग्भ्यां पटमपसार्य विट्ठलं प्रार्थनापूर्वकमात्मक्षमापणं याचितवान् । तदा प्रीतो विट्ठलस्तस्य शिवभक्तिं सक्तुं, हरिहरयोरभेदं च लोके प्रख्यापयितुं शिवलिङ्गं मूर्ध्नि सद्यो धारयामास । ततः प्रभृति मूर्ध्ना शिवलिङ्गं धारयन्तीमेव विट्ठलमूर्तिं विधातुं रीतिः प्रचलिता ।

८५ उपास्यः स योगेश्वरारामरामो, रमेते जपे तस्य गौरी हरश्च ।
स्वयं चन्द्रमौलिस्तपस्वी प्रशान्तः, स रामः प्रभुर्वोऽन्तकाले विमोक्ता ॥

८६ मुखे यस्य रामः, स आप्नोति नित्यं, सदाऽऽनन्दविश्रामपूर्णप्रसादम् ।
सशंकश्रमास्ते विना नाम वन्ध्या, निजं धाम तत्प्रापयत्यार्तिहीनम् ॥

८७ जपन् राममाप्नोति नो कामबाधां, सधैर्यं तरत्यापदः कीर्तयंस्तम् ।
जयत्युग्रकामं बली रामभक्तः, स धन्योऽवनौ मारुतिर्ब्रह्मचारी ॥

८८ प्रशस्यं भृशं राघवस्यास्य नाम, सुवाच्यं मधु स्वल्पमास्ते त्वमूल्यम् ।
ध्रुवं जन्ममृत्युद्रुमोन्मूलनाय, स एव प्रमोक्षो मनो ! मानवानाम् ॥

८९ प्रतिग्रासमीदृग्वदेद्रामनाम, तदुद्घोषयेदादरेणासकृच्च ।
हरेश्चिन्तनेऽन्नं सदा भक्षयेच्च, स्वभावात्ततः श्रीहरिः प्राप्यतेऽसौ ॥

९० स खल्वात्महा, वाचि रामो न यस्य, न तं मानयन् ना वृथा जीवतीह ।
स्तुतं नाम वेदैश्च शास्त्रैः पुराणैः, स्तुतं व्यासवाचापि भूयो नितान्तम् ॥

९१ समुद्विज्यतां मा मनो ! रामचन्द्राद्, मनः ! प्रोच्यतां तस्य नामादरेण ।
विना मूल्यमेवोपलभ्यं मुखे तत्, समुद्घोष्यतां जानकीवल्लभोऽसौ ॥

९२ समुद्घोषणात् सादरं रामनाम्नो, गिरेर्गह्वरं प्रद्रवन्त्याशु दोषाः ।
स्वनामोपतिष्ठत्यनन्तः सुतुष्टो, विशेषेण नामातिलुब्धः शिवश्च ॥

९३ जगत्यन्नदाता य एकोऽस्ति देवो, वहत्येष नः सर्वसंसारचिन्ताम् ।
अमूल्यं तु तन्नाम सेविष्यसे चेद्, मनस् ! ते भविष्यत्यरे ! का नु हानिः ?

९४ त्रिलोकीं प्रदग्धुं क्षमः कोपितो यः, स नाम्नाप शान्तिं शिवः क्ष्वेडदाहात् ।
जपत्यादरात् पर्वती विश्वमाता, तदेवोच्यतां नाम तस्मात् समस्तैः ॥

९५ वदन् पुत्रकामेन नारायणेति, पुराऽजामिलः पापकर्मा विमुक्तः ।
शुकं शिक्षयन्तीशनामापि वेश्या, विमुक्ता पुराणे गता च प्रसिद्धिम् ॥

९६ कुले दानवानां कयाधोः सुपुत्रो, जपन्नीशनाम स्थितोऽसौ सदैव ।
स दैत्याधिराजः पिता पापकर्मा, प्रविद्वेष्टि नामेत्यमृष्यन्न पुत्रः ॥

९७ कुतो नामहीनस्य रे! मुक्तिवार्ता? ह्यहंकारदृप्तः सदा यातनाभाक् ।
स दैन्यान्वितो मृत्युरेष्यत्यवश्यं, ततः प्रोच्यतां प्रोच्यतां देवनाम ।

९८ शिलास्तारिता निश्चितं रामनाम्ना, मनस्! तारिता नाल्पसंख्या मनुष्याः ।
नरः सर्वथा तत्र चाश्रद्दधानः, कदापि प्रवर्तेत नो पापरूपः ॥

९९ सुधन्येह वाराणसी पुण्यराशिर्, द्रुतं मोक्षदा यात्रिकाणां पितॄणाम् ।
सुलभ्यं तु तद् रामनाम्ना सुपुण्यम्, इतीशः सदा बोधयन् नृभ्य आस्ते ॥

१०० न सम्पद्यते कर्म शास्त्रोक्तरीत्या, कृतं चाऽयथोक्तं न पुण्यं तनोति ।
मनाग् नानुकम्पाऽन्तरे प्राणिनोऽर्थं, मुखे नास्ति तन्नाम मूल्यं विनापि ॥

१०१ सशङ्कश्च यो नाम्नि विश्वासशून्यो, यमादुग्रदण्डं स आप्नोति, धिक्! तम् ।
ततः सेव्यतां नाम रे! ऽत्यादरेण, तदुच्चारमात्रात् क्षयं पापमेति ॥

१०२ सदात्यन्तनम्रत्वमाश्रित्य तोषो, मनः! सज्जनानां त्वयोपार्जितव्यः ।
सदा क्षीयतां स्वीयदेहः परार्थं, गुणाढ्यः सदा सेव्यतामादरेण ॥

शिबिका*

देवुलपल्लि वेङ्कटकृष्णशास्त्री

अनु० कालूरि हनुमन्तरावः

प्राणेश्वरेण शिबिका प्रहिता मदर्थ-
मित्येव मद्हृदयमुद्विजते प्रगाढम् ।
शुष्का वियोगपरितप्तशरीरयष्टिः
शाखा प्रवालरुचिरा सुमदाम चाभूत् ॥ १ ॥

हस्तौ प्रसाधनविधौ मम कम्पमानौ
अभ्राम्बराणि मिहिरोदयभूषणानि ।
हर्षोऽपि मां प्रदहतीव हृदन्तरं मे
उड्डीयमानमिव सौख्यभरेण साकम् ॥ २ ॥

मन्दं विलोलचलनेन लता चलन्ती
पौष्पे निषद्य डयने सुममालिकाहम् ।
गच्छामि वाहकजनेषु मुहुर्नदत्सु
मार्गे समस्तनगरेण निरीक्ष्यमाणा ॥ ३ ॥

हो हो ह हेति वहकण्ठरवैरुदीर्णैः
आरामरम्यपदवी प्रतिबोधिताऽऽसीत् ।
हो हो ह हेति वहकण्ठरवैरुदीर्णैः
जागर्ति काननबहिर्विमलाम्बुकुल्या ॥ ४ ॥

प्रणयविपञ्चिका शिबिका
कुसुमितवल्लिका शिबिका ।
इन्द्रधनुर्वक्ररेखिका शिबिका
मधुरसुखस्वप्नशाखिका शिबिका ॥ ५ ॥

---

* श्रीदेवुलपल्लिवेंकटकृष्णशास्त्रिकृत "पल्लकी" नामकान्प्रखण्डकाव्यस्य अनुवादः ।

मधुसञ्चयः

गान्धीसूक्तिप्रकरानुवादः

अनु० शैलेन्द्रनाथसिद्धनाथपाठकः (आवन्तिक)

१ एकस्तपोबलेनैव जगत् कम्पयतेऽखिलम् ।
अनन्यश्रद्धया कृत्स्नं किं तद् यन्नैव जायते ॥

(नवजीवने १-१०-२९)

२ श्रद्धानामात्मविश्वासो विश्वासो हीशधीर्दृढा ।
व्यसनोदधिमग्नोऽपि श्वसिति श्रद्धया सुखम् ॥

३ घृणातः प्रेमभावस्य गरीयस्त्वं मतं बुधैः ।
असत्यात् सत्यमेवात्र लोके सन्दृश्यतेऽधिकम् ॥

४ स्वास्थ्यं सत्यमहिंसा च रोगो मिथ्याविजृम्भितम् ।
आभ्यां लोकस्थितिर्विद्यादन्यथा मरणं ध्रुवम् ॥

(नवजीवने १५-१२-२७)

५ शान्तिवीर्यधनः प्रौढो ब्रह्मचारीति मे मतिः ।
ब्रह्मचारी क्षणक्रोधी दोषीत्येव न संशयः ॥

६ अन्वेष्यं हि सदा सत्यं शिवं सुन्दरमन्ततः ।
स्वयमेव प्रवर्तेते शश्वत्सत्यानुगामिनौ ॥

७ अध्यात्मशक्तिजं पुण्यं निर्ममत्वं मतं भुवि ।
नैव सन्दृश्यते कोऽपि पापी नीतिपथानुगः ॥

८ पुनर्जन्मनि विश्वासो दृढाद् दृढतमो मम ।
सम्बन्धानां हि कर्तारः संस्काराः पूर्वजन्मनाम् ॥

९ सर्वशक्तिमतः साक्षात्कारो धर्मः प्रकीर्तितः ।
धर्मस्यैतद्धि माहात्म्यं यत्कर्तुः स्वात्मदर्शनम् ॥

१० जीवितस्य प्रकाशस्य बीजभूतः परेश्वरः ।
तस्य स्तुत्या हि जीवामि स्तुतिहीनः श्वसन् मृतः ॥

(आत्मकथायाः)

मधुशाला*

माधव देशपाण्डे

[आधुनिकहिन्दीकविकुलशेखर 'बच्चन' कृतात्
'मधुशाला' - काव्यात् कतिपयानां रुबायानां
स्वैरानुवादः ।]

*　　*　　*

संस्कृतवाङ्मधुमिलिन्दवृन्दम्
नन्दयितुं मदमधुरमिदम्
'बच्चन'-कविकुलगुरुणा कलितम्
'माधवेन' मधु सङ्कलितम् !
　　उपहारोऽयं मदिराचषकः
　　स्वीक्रियताम् ! मधुपानकराः !
माधवः सखा! कविता मदिरा !
रुचिरा भवतान्मधुशाला !

*　　*　　*

१ मृदुभावानां द्राक्षानिकरैः
आरचिता मदिराऽनीता,
ममैव करयुगलेन पाययेत्वां रसिक! प्रिय! मधुचषकम्,
　　त्वदर्चनं विदधे प्रथममहम्,
　　लभेत मोदं जगदूर्ध्वम्,
प्रथमतश्च ते व्याहरतीयम्
स्वागतं हि मन्मधुशाला ।

२ यदि पिपासितस्त्वमहो! विश्वम्
प्रमथ्य निखिलं मधु विदधे,
भूत्वा सखा गृहीत्वा चषकम्
तनोमि नृत्यं ललितपदम्,
जीवनस्य मधुता तव पूर्वम्
प्रवर्षिता त्वयि बहुवारम्,
अद्य पुनस्ते समर्पयिष्ये
जगतीं मधुरां मधुशालाम् ।

३ प्रियतम! रसिक! मधु त्वमहो मे,
तृषाकुलस्तव चषकोऽहम्,
सहृदय! मयि हृदयं स्वं निदधन्-
मधुपश्च पुनर्भवसि त्वम्,
धुनोम्यहं त्वां वारं वारम्,
निपीय मां च मदं तनुषे,
आवयोरुभौ परस्परं प्रति
सम्प्रति जातौ मधुशाले ।

४ भावद्राक्षालतासकाशात्
कलितेयं प्रतिभा-मदिरा,
तया प्रपूर्णं कविता-चषकम्
प्रापयति त्वां कविः सखा,
न्यूनता न कणतोऽपि भवेदिह,
पिबन्तु मधुपा अतिलक्षम्,
पानकरा रसिकास्ते सम्प्रति,
कवितेयं मे मधुशाला ।

५ मधुभावानामनिशं विदधे
मदयन्तीं मदिरां मधुराम,
अमुना मधुना स्वीयं तृषितम्
पूरयाम्यहं हृच्चषकम्,
उन्नीयेमं प्रतिभाकरयोः
करोमि कण्ठे मधु स्वयम्,
पानकरोऽहम्, चषकहरोऽहम्,
अहमेव सखे! मधुशाला ।

६ मदिरालयमुपयातुं मधुपः
त्वरया निष्क्रान्तो भवनात्,
'केन पथा गमनीयम्? '-इत्यहो
सरलमनास्तनुते चिन्ताम्,
नैकपथान् कथयन्ति जनास्ते,
परमहमेवं कथयिष्ये—
'एकं कमपि स्वीकुरु मार्गम्,
गमिष्यसि त्वं मधुशालाम्!'

७ गमने गमने कियत्कियन्मम
हन्त! जीवितं गतं गतम्!
'अतोऽपि दूरम्'-कथयति सकलो
जनो दर्शयन् पन्थानम्,
गन्तुं पुरो न मयि तद् धैर्यम्,
साहसं न वा निवर्तितुम्,
मां कर्तव्यविमूढं कृत्वा
दूरतः स्थिता मधुशाला ।

८ गच्छन् कुरु सततं जपमेवम्—
'मधु मदिरा मादक-हाला !'
नियतं करयोरनुभव कञ्चन
ललितकल्पितं मधुचषकम्,
मनसि कुरुष्व च तामतिमधुराम्
कान्तां सुखदां सखिबालाम्,
गच्छ तथा हे पान्थ ! पुरस्तव,
न हि दूरे स्यान्मधुशाला ।

९ मदिरां पातुं मनोऽभिलाषा
भवेद्वारुणी यदि सैव,
उत्सुकतायामधरयोरयम्
चषकस्तु यदाऽऽभासेत,
ध्याननिमग्ने मनसि यदा प्रिय !
भवेत् सुमूर्तश्चषकहरः,
स्यान्न सुरा, चषको न सखा स्यात्,
त्वमाप्नुयास्तां मधुशालाम् ।

१० शृणु कलकल-छलछलमिति नादम्,
पतति घटान्मदिरा चषके,
शृणु नूपुरशिञ्जितरवमेनम्,
वितरति मधु सा सखिबाला,
सम्प्राप्ता बत किञ्चिद्दूरम्,
पदं तु किञ्चिद् गमनीयम्,
आलपन्ति मधुपाः, शृणु गोष्ठीम्,
पश्य राजते मधुशाला ।

११ जलतरङ्गरणितं कणितं तत्
चुम्बति यच्चषकश्चषकम्,
झणज्झणाकुरुते खलु वीणा
चलति यदा सा सखिबाला,
कल्लोलो मधुविक्रेतुरयम्
मृदङ्गघोषं किं तनुते ?
मधुरवेण मधुनो मादकताम्
वर्धयतितरां मधुशाला ।

१२ निपतन्ती लोहितमदिरायाः
धारा, तां मा वद दहनम्,
फेनिला सुरा, न तां कदाचित्
ब्रूहि वक्षसः पञ्जरिकाम्,
चिन्ता मदः सुराया अस्याः,
विगतस्मृतयः सखिबालाः,
पीडायां बत यस्यामोदः
स आयातु मे मधुशालाम् ।

१३ भुवि स्थिता शीतलमदिरेव न
पथिक! कदाचिन्मम हाला,
स्थिरशीतललौकिकचषकनिभः
पथिक! न कश्चिन्मम चषकः,
ज्वलत्सुराया ज्वलिते चषके
दग्धचेतसः कवितेयम्!
ज्वलनाद् यस्य भयं न भवेदिह
समायातु मे मधुशालाम् ।

१४ प्रवहन्ती मदिरा दृष्टा ननु
हृदि च समुद्गच्छति हाला,
पश्यत चषकं झटिति स्पृष्टे
प्रज्वलयन्तं पिबदधरम्,
'किमोष्ठेन वपुरखिलं दहतात्
लभेय मधुनो बिन्दुयुगम्!'-
इत्थं मदिराप्रणयिजनानिह
समाह्वयति मे मधुशाला ।

१५ धर्मग्रन्थानखिलानदहत्
यस्य हृदिस्थमिदं ज्योतिः,
मन्दिरमस्जिच्चर्चसङ्गतम्
भिनत्ति बन्धं यो धीरः,
पण्डितमोमिन्फादर्नाम्नाम्
दुराकृतं यो दारितवान्,
स्वागतमस्य विधातुमद्य मे
पारयेदियं मधुशाला ।

१६ उत्कण्ठिताधराभ्यां येन न
हन्त! चुम्बिता सा मदिरा,
हर्षविकम्पितकरेण येन च
हन्त! न संस्पृष्टश्चषकः,
करो गृहीत्वा लज्जितसख्याः
येन समीपमनाकृष्टः,
व्यर्थमायुषो नीता शोषम्
तेन मधुमयी मधुशाला ।

१७ पूजाकृदस्तु सा सखिबाला,
गङ्गाजलं पवित्रसुरा,
भ्रमन्ती सदा भवतु सवेगम्
मधुनश्चषकाणां माला,
'गृहाणाधिकं, पिब त्वमधिकम् !'—
मन्त्रस्यास्य जपं कुरुतात्,
अहं गमिष्ये शिवमूर्तित्वम्,
मन्दिरं भवेन्मधुशाला ।

१८ नदतु मन्दिरे न घटीयन्त्रम्,
नारोहतु मूर्तौ माला,
'मुअज्जिन'स्तिष्ठतु स्वगेहे
मरिजत् सतालकं कृत्वा,
सन्तु हृता नृपतीनां कोषाः,
दुर्गभित्तिपातो भवतात्,
भवन्तु भद्राः पानकरास्ते
नास्तु कुण्ठिता मधुशाला ।

१९ विनष्टेषु खलु महाकुलेष्वपि
रुदितं कश्चिन्न च कुर्यात्,
व्रजन्तु शान्तिं मन्दिराणि बत
येषु नर्तिकाः सुरबालाः,
राज्यानि च नश्यन्तु नृपाणां
भाग्यसुलक्ष्मीः स्वापरता,
पुनः सङ्गमिष्यन्ते मधुपाः,
जागृयादियं मधुशाला ।

२० विलीयेत कृत्स्नं परं भवेत्
कान्ता सखी, यमः कृष्णः;
सर्वे शुष्यन्तु रसाः, स्यादिह
हालाहलं तथा हाला,
चलनवलनकल्लोलादीनाम्
स्थानं स्यान्निखिलं शान्तम्,
अशान्तमनिशं भवेत् श्मशानम्,
अतन्द्रिता स्यान्मधुशाला ।

२१ भृशं निन्दितो जगति सन्ततम्
कुटिलचञ्चलो मधुचषकः,
विषयभोगरसिकश्चषकहरः,
वीतविवेकः पानकरः,
कुतः सम्मता मधुशाला स्यात्?
जगतश्चित्तं न विशुद्धम्,
जर्जरजगति प्रतिदिनक्षणम्
नित्यनूतना मधुशाला ।

२२ अपीत्वैव मधु यो मधुशालाम्
दूषयेत्, स किं साधुवदः ?
पानाद् ऊर्ध्वं मुखेऽस्य तावत्
दृढा तालिका स्यान्निहिता,
द्रोहि-दासयोरुभयोर्मध्ये
जयः सुरायाश्चषकस्य,
विश्वविजयिनी जगति संस्थिता
सम्प्राप्ता मे मधुशाला ।

२३ मदिरालयमुत्फुल्लं मुदितम्,
जगद् व्रजतु कृत्स्नं प्रलयम्,
'मुहर्रम'तमस्तत्र प्रसरतु,
पुनर्होलिकाया ज्वाला,
अधोऽवतीर्णा स्वर्गलोकतो
वसुधायां न च वेत्त्यसुखम्,
पठतु 'मर्सियां' निखिलं विश्वम्,
'ईदं' मनुते मधुशाला ।

२४ एकवारमेकस्मिन् वर्षे
स्फुरति होलिकाया ज्वाला,
एकवारमिह वह्नेः सुषमा,
ज्वलति च दीपानां माला,
जनाः परं दिवसे कस्मिन्नपि
पश्यत मदिरालयमेत्य,
दिवा होलिकां, निशि दीपावलिम्,
अनिशं मनुते मधुशाला ।

२५ को न वेत्ति यन्मनुजो जगति
प्राप्तो भूत्वा पानकरः?
परिचिता न खलु कस्य सा सखी
पयः पायितं सुमधु यया?
प्राप्य जीवनं, पीत्वा मनुजाः
जीवन्ति मुदा यत् तस्मात्
समेत्य जगति प्राप्तवानयं
प्रथमं स्वायुषि मधुशालाम् ।

२६ द्राक्षालता भवन्तु समस्ताः
याभ्यः कलितेयं मदिरा,
भवतु सन्ततं मृत्तिका च सा
यतो निर्मितो मधुचषकः,
वर्ततां च वारुणीपिपासा
तृप्ततां न या जानीते,
वर्तन्तां मधुपानकरास्ते,
वर्ततामियं मधुशाला ।

२७ विद्धि कुशलिनं मां, कुशलवती
यदि भवेदियं सखिबाला,
अमङ्गलं मङ्गलं वेत्ति किमु
मदावलिप्तः पानकरः ?
प्रियसुहृदः ! पृच्छत न मे शुभम्,
पृच्छत बत मधुशालायाः,
'जय रामे'ति ब्रूत न सहितम्,
वदत 'जयतु सा मधुशाला ।'

२८ सूर्यो भवेत् सुराविक्रेता,
सिन्धुर्घटो, जलं हाला,
वारिधराः प्राप्ताः सखिबाला,
भूमिरेव मधुनश्चषकः,
अनारतं सा वर्षति मदिरा
रिम् झिम् रिम् झिम्-रव-युक्ता,
मधुपोऽहं, तरुतृणलतादयो,
वर्षाकालो मधुशाला ।

२९ तारागणमणिमण्डितं नभो
भवेन्नाम मधुनश्चषकः,
विधाय नीचैर्भवेत् प्रपूर्णा
तस्मिन् सागरजलहाला,
　　मत्तसमीरः सखितां यातो
　　यदि कुर्यादधराश्लेषम्,
सागरतीरात् प्रसृतं कृत्स्नम्
विश्वमिदं स्यान्मधुशाला ।

३० भवेदोष्ठयोः रसोऽपि कश्चित्,
जिह्वायां मदिरैव रसः,
भवतु भाजनं किञ्चिदपि करे,
स्थितो भासते मधुचषकः;
　　प्रत्येकं वदनं खलु सख्याः
　　मुखे च लभते परिवर्तम्,
अक्ष्णोः पुरो भवतु यत्किञ्चित्,
स्थिता नेत्रयोर्मधुशाला ।

३१ कुसुमचषकधारिणो वृक्षकाः
भवन्त्यद्य ते सखिबालाः,
येषां चषके संनिवेशिता
गन्धसुरभिता रसमदिरा,
　　भूयो याच्ञाकरा मधुकराः
　　पिबन्ति रसमदिरामनिशम्,
मदकम्प्राश्चञ्चला भवन्तः,
किमुपवनम् ? सा मधुशाला ।

३२ मन्दवायुलहरीणां चषके
वसन्तसौरभमिह मदिरा,
प्रपूर्यानिलः पाययत्ययम्
भूत्वा मधुमदमत्तमनाः,
नवहरिताः पल्लवास्तरुगणाः,
नूतनशाखास्ता लतिकाः
सन्ति कम्पिता नर्तनरक्ताः,
मधुवने स्थिता मधुशाला ।

३३ उपैति भूत्वारुणा सा सखी
यावत्प्रातरुषा बाला,
धरा तारकायुतमावरणम्
प्रतिदत्ते, गृह्णाति सुराम् ,
अगणितकरकिरणैर्निपीय याम्
मत्तविहङ्गा गानरताः,
प्रतिप्रभातं निखिलनिसर्गे
भवति मुखरिता मधुशाला ।

३४ यदा दूरमयतेऽस्याः प्रमदः,
समायाति सन्ध्या-बाला,
भृशं पुराणी बहु मदयन्ती
नित्यं नृत्यति सा हाला,
जीवनतापः शोकः कृत्स्नो
गच्छति विलयं यां पीत्वा,
सुरास्वापमनुभवन्ति मधुपाः,
जागर्ति परं मधुशाला ।

३५ अन्धकार इह मधुविक्रेता,
सखी सुरम्या शशिबाला,
किरणे किरणे सा दीप्तिमती
नितान्तकान्ता शीतलता,
यां पीत्वा चेतनतां हित्वा
स्वीकुर्वते मुदा पातम्
तारकाकुलान्मधुपानकराः,
निशा न चैषा मधुशाला ।

३६ व्यापारयामि दिशि कस्यामपि
नेत्रे, दृशि तिष्ठति हाला;
आलोकयामि कामपि काष्ठाम्,
याति नयनसरणिं चषकः;
लोचने स्थिते कुत्रचित् परम्
दृष्टिगोचरश्चषकहरः;
चारिते च मेऽक्षिणी कुत्रचित्,
दृश्यते तु सा मधुशाला ।

३७ भूत्वा सखी वेणुरायातः
सहानीय करयोश्चषकम्,
आनीता नृत्यन्ती यस्मिन्
अधरसुधारसमयमदिरा,
तया सङ्गतो योगीशोऽयम्
'नटवर'-इत्यभिधानमधात्,
पश्यत, कान् कीदृशानपीयम्
नर्तयतितरां मधुशाला ।

३८ वादयिता मधुनो विक्रेता,
स्वरमधुरा मधुरा मदिरा,
रागविशेषाः सखितां याताः,
तन्त्रीणां चषकाः पूर्णाः,
लयिभिरालापैर्धावन्ती
विक्रेतुः सङ्केतपरा
पाययति श्रोतॄन् वीणेयम्
कृतझङ्कारा मधुशाला ।

३९ सखितां यातश्चित्रलेखकः,
शलाकैव मदिराचषकः,
प्रपूर्य यस्यां पाययत्यसौ
वर्णवारुणीं रसबहुलाम्,
मनसश्चित्राण्यपि यां पीत्वा
रुचिं लभन्ते बहुवर्णाम्,
नृत्यति फलके चित्राणामिह
कान्ता काचिन्मधुशाला ।

४० मेघश्यामा द्राक्षात्रततिः
कलिता तत एषा हाला,
अरुणकमलकोमलकलिकानाम्
कुञ्जे कुसुमानां चषकः,
रक्तस्तबकाः सखितामाप्ताः
रक्तिममधुना परिपूर्णाः,
मत्ता हंसाः पायंपायम्,
मानससरो हि मधुशाला ।

४१ हिमराजिर्द्राक्षालतेव सा
वितता, हिमजलमिह मदिरा,
सखिबालाश्चञ्चलसरितस्ताः
सम्भृतजललहरीचषकाः,
मृदुशीतकरैश्चषकान् धृत्वा
व्रजन्ति नित्यं सेकरताः,
पानोत्सस्यं क्षेत्रजातमपि,
शुभं भारतं मधुशाला ।

४२ वीरसुतानां हृदयलोहितैः
रचयन्ती रक्तिममदिराम्,
वीरसुतानां वरैः शिरोभिः
कलयन्ती करयोश्चषकान्,
अत्युदारहृदया च सखीयम्
स्थिताद्य नो भारतमाता,
स्वतन्त्रतेयं तृषितकालिका,
बलिवेदिरियं मधुशाला ।

४३ सम्प्रति दूरीकृतो मस्जिता
मां मत्तं मधुपं वदता,
निर्गमितष्ठाकुरद्वारतो
हस्ततले चषकं दृष्ट्वा,
जगति लभ्यते स्थानं क्व नु मे
दुर्भगस्य विभ्रष्टस्य,
नयति मां न चेदात्मीयत्वम्
शरणस्थली हि मधुशाला ।

४४ भूत्वा पथिको भ्रमन् स्थितोऽहम्,
सर्वत्र सुलभ्या मदिरा,
सर्वत्र च लभ्यते प्रियसखी,
सर्वत्रैव तथा चषकः,
अयि सुहृदः! स्थातुं न कदाचित्
क्लेशः कश्चिन्मे चित्ते,
न चास्तु मस्जिद्, मन्दिरं न वा,
सम्प्राप्यते हि मधुशाला ।

(अनुवर्ति)

निकषोपलः

वैदिकव्याकरणम्

डा० रामगोपालेन सन्दृब्धम् । नेशनल् पब्लिषिङ् हौस्, जवाहर नगरम्, देहली-७. प्रथमो भागः १९६५. द्वितीयो भागः १९६९. रू. २०. रू. २८.

व्याकरणं वेदाङ्गतया गण्यते । वेदभाषाविवेचनस्य मूलभूतेषु ग्रन्थेषु प्रातिशाख्यानि प्रथमानि, तदनन्तरं यास्कस्य निरुक्तम्, ततश्च वैदिकप्रक्रिया-विषयकानि पाणिनीयान्तर्भूतानि सूत्राणि । आधुनिके काले प्रायः पाश्चात्य-विद्वद्भिरत्र वैदिकविचारे रसिकैः जर्मन्-फ्रेञ्च्-आङ्ग्लभाषासु पृथक् पुस्तकानि, तथा बहुषु च विमर्शपत्रिकासु प्रकटितेषु लेखेषु च लौकिकवैदिकयोः संस्कृतयोः मनाक् वैदिकस्यैव च व्याकरणानि कार्त्स्न्येन वा एकदेशेन वा प्रकाशितानि, येषु मुख्यतमम् आक्स्फोर्ड्विश्वविद्यालये संस्कृताध्यापकपदमलङ्-कृतवता ए. ए. माग्डोनाल्ड्-नामकेन प्रसिद्धेन संस्कृतविदुषा विरचितं वैदिकव्याकरणं, छात्रोपयोगि वैदिकव्याकरणमिति ख्यातं पुस्तकद्वयम् ।

भारतीयभाषासु, अथवा आङ्ग्लवाण्यामेव, वैदिकव्याकरण-परिशीलनविषये भारतीयैः संस्कृतविद्वद्भिः न तथा पराक्रान्तम् । अतः श्लाघार्होऽयं डा. रामगोपालमहाशयानां हिन्दीभाषया वैदिकव्याकरण-निबन्धनात्मको व्यवसायः ।

अस्मिन् ग्रन्थे ९०४-पत्रात्मके संपुटद्वयेन सन्दृब्धे आङ्ग्ल-फ्रेञ्च्-जर्मन्-भाषासु आधुनिक-पाश्चात्यविद्वद्भिः प्रदर्शिताः विषयाः, तथा प्राचीनैः भारतीयैराचार्यैः विचारिता विषयाश्च क्रोडीकृत्य तत्र तत्रापेक्षितानि परिष्कर-णानि च विधाय वैदिकसंस्कृते लौकिकसंस्कृतापेक्षया दृश्यमानाः सर्वे विशेषाः सोदाहरणं परिशीलिताः । वर्ण-सन्धि-नाम-समास-तद्धित-आख्यात-कृत्-वाक्य-स्वर-छन्दांसि इति द्वादशभिरध्यायैः सर्वापि वैदिकी भाषा साहित्यप्रक्रिया च ग्रन्थकृतात्र सम्यग् व्याकृता । ग्रन्थश्चायं न केवलं छात्राणामपि तु पण्डितानां च महत उपकाराय भविष्यति ॥ (वे. रा.)

विवाहमन्त्रार्थाः

श्रीरामायणमुद्रणालयः, मद्रास्-४

वेद-भाष्य-श्रौतविज्ञैः श्रीरामनाथदीक्षितैरत्र विवाहमन्त्राः देवनागरी-लिप्यां मुद्रिताः, द्रमिडवाण्या अनूदिताश्च । इदं च लघ्वपि पुस्तकं अद्य विवाहादिसंस्कारेषु जनानां शिथिलीभवन्तीं श्रद्धामुज्जीवयिष्यति द्रढयिष्यति च ॥

व्याससुभाषितसंग्रहः

डा० लुड्विक् स्टेर्ण्बाख्-विदुषा सम्पादितः । चौखाम्बा संस्कृत सीरीज् आफिस्, वाराणसी-१. १९६९. रू. १०.

संस्कृतसाहित्यसागरे यद्रत्नभूतं सुभाषितं नाम, प्रकाशते असंख्येयतया, वर्तते च तत्र तत्र विप्रकीर्णतया, तस्य सर्वस्यापि यावच्छक्ति सङ्कलनं कृत्वा प्रकाशनं नाम महानेष बहु-चिर-प्रयाससाध्यः कार्यभारः । तत्र व्यग्रः प्रशस्योद्योगोऽयं पाश्चात्यसंस्कृतविद्वान् लुड्विक् स्टेर्णबाख् - समाख्यः । बहूनि च तेनैवं सम्पादितानि सुभाषितसङ्ग्रहपुस्तकानि प्रकाशं गतानि प्रथन्ते । तेष्वयं व्याससुभाषितसंग्रहो नचिरात् प्रकाशितः । व्यासशतकनाम्ना ख्यातोऽयं संग्रहः दाक्षिणात्यः दक्षिणदेशस्थपुस्तकालयेष्वेव मातृकासु उपलभ्यते, दक्षिणदेशस्थसुभाषितकोशेषु च उद्धृतः । संस्कृतसाहित्यस्य बहिर्देशेषु पुरा यः प्रचार आसीत् तद्विचारकौतुकावहोऽयं विषयः यदेतत् व्यास-शतकं सिंहलद्वीपे 'व्यासकारय' नाम्ना सिंहलानुवादेन सह उपलभ्यते इति । तानेतान् आधारानादाय स्टेर्ण्बाख्-विदुषा सम्यक् परिशील्य सपाठभेदं संस्कृत्य सम्पादितोऽयं ग्रन्थः । अत्रत्यश्लोकानां ग्रन्थान्तरेषु सम्भवं विचार्य चाणक्यशतकादिसंग्रहादिभिः सह साम्यं च प्रदर्शितं सम्पादकेन ॥

(वे. रा.)

श्रीमद्भागवतमहिमा

श्रीजयतीर्थाचार्यैः सम्पादितः । १/१, २ क्रास्, बसवनकुटी, बेङ्गलूर्-४ ।

पाद्मे द्वादशभिरध्यायैर्भागवतपुराणस्य माहात्म्यं यत्कीर्तितं, तदत्र भक्तानां पठनसौकर्यार्थं पृथक् पुस्तकरूपेण प्रख्यातैः भागवतप्रवचनप्रवणैः श्रीजयतीर्थाचार्यैः सोपोद्घातं प्रकाशितम् ॥ (वे. रा.)

दिव्यसूरि (आळ्वार्) चरितानि

श्रीजग्गु वेङ्कटाचार्यैर्लिखितानि । ग्रन्थकृत्, विशिष्टाद्वैतविभागाध्यक्षः, महाराजसंस्कृतकलाशाला, मैसूर् । १९६९. रू. ६.

सुविदिता एते ग्रन्थकाराः प्रतिभावाचकानां परिचिता एव । अलङ्कारे नूतनसाहित्यसृष्टौ फलबन्धिनो बहवो व्यवसाया एतेषां तदा तदा प्रकाशं गताः, रसिकैः पण्डितैश्च विमृष्टाः श्लाघिताश्च । तेषां ग्रन्थमालायां पुस्तकमिदम् एकोनविंशः । वैशिष्ट्यमस्य बहुधा भाति । वैष्णवभक्ति-प्रस्थानमूलभूतदिव्यसूरीणामाल्वार् - इति द्रमिडभाषायां प्रसिद्धानां यच्चरित्रं माहात्म्यं च दक्षिणापथे प्रसिद्धं तत्सर्वमेतद्ग्रन्थद्वारा अन्यत्र सर्वत्र वर्तमानानां भारतीयानां विदुषां भक्तानां च विदितो भवति । आधुनिक-संस्कृतसाहित्ये गद्यबन्धदारिद्र्यं यज्जागर्ति तं दोषमप्यपाकरोति प्रबन्धकानामेतेषां रचनेयम । ये च इतिहासविषयकुतुकिन, तेषां कृते चात्र दिव्यसूरीणां कालनिर्णयः तच्चरित्रप्रतिपादकाः प्राचीनाः संस्कृतग्रन्थाः, दिव्यसूरिचरित्र-तत्कृतगाथागतविशेषादिसारः इत्येतत् सर्वमत्र संस्कृतेन आङ्ग्लभाषया च उपोद्घाते अनुबन्धेषु च दत्तं ग्रन्थस्य उपयोगितामुपबृंहयति । दक्षिणवैष्णवा-लयेषु दिव्यसूरीणां पूजाप्रपत्त्यर्थं यानि बिम्बानि प्रतिष्ठितानि, तान्यप्यत्र चित्ररूपेण दत्तानि । समीचीनमेवेदं यत् केन्द्रीयसंस्कृतसमितिरस्य प्रकाशनस्य कृते द्रव्योपकारं व्यतरत् । (वे. रा.)

श्रीमद्वेदान्तदेशिकवैभवम्

द्रमिडमूलग्रन्थकर्तारः श्रीमन्तो द्वितीयब्रह्मतन्त्रस्वामिनः, संस्कृतानुवादकाः तिरुवहीन्द्रपुरदेवनाथदेशिकाचार्याः । मूल्यं, प्राप्तिस्थानं च न निर्दिष्टम् ।

विशिष्टाद्वैतसिद्धान्तप्रवर्तनधुरन्धराः विरचितबहुग्रन्था वेदान्तदेशिका-परनामानो वेङ्कटनाथाः सुप्रसिद्धाः । द्वितीयब्रह्मतन्त्रस्वामिविरचितासु द्रमिड-मयीषु पूर्वाचार्यकथासु वेदान्तदेशिकस्य या कथा सात्र सुलभया गद्यमय्या शैल्या निर्वर्तिता श्रीमद्भिः देवनाथदेशिकाचार्यैः ।

ग्रन्थेऽस्मिन् वेदान्तदेशिकानां प्रादुर्भावः, पाण्डित्यप्रभावः, दिव्यक्षेत्र-पर्यटनभगवदनुग्रहप्राप्ति-ग्रन्थप्रणयनादिकाश्च बहवो विषयाः प्रतिपादिताः । तत्र तत्र श्रुतिदिव्यप्रबन्धवाक्यानां देशिककृतनिर्वाहा विशेषार्थाश्च निरूपिताः ।

उदाहृतानां ग्रन्थानां, श्लोकानां, विषयाणां च सूचीभिः सह परिष्कृत्य न प्रकाशित इति परं विषादस्थानम् । (मु. न.)

परतत्त्वप्रकाशिका

कर्ता वेलिदि शेषय्यशास्त्री, संस्कृतपण्डितः, प्राच्योन्नतपाठशाला, भीमवरम् (पश्चिमगोदावरी), आ. प्र. । रू. ५.

अस्मिन् आन्ध्रग्रन्थे श्रुतिस्मृत्यादिप्रमाणप्रदर्शनपुरस्सरं मुमुक्षुजनोपयोगि परजीवस्वरूपस्वभावनिरूपणं, मुक्तितत्साधनस्वरूपनिरूपणं च कृतम् । एतदुपष्टम्भका अन्येऽपि विषयाः, शरीरं, इन्द्रियाणि, पञ्चकोशाः, जाग्रदाद्यवस्थाः, जीवजनिः, प्रारब्धं, कर्म, ज्ञानं, मरणमित्येते सुलभया शैल्या सोदाहरणं प्रतिपादिताः । परतत्त्वजिज्ञासूनां आन्ध्रभाषाविदामयं ग्रन्थ उपकारक इत्यत्र न सन्देहः । अत्रोदाहृतानां स्मृतिग्रन्थस्थश्लोकानां, तथा श्रुतिवाक्यानां च आकरनिर्देशो बहुषु स्थलेषु न कृत इत्ययमंशस्तावत् ग्रन्थस्य प्रयोजनं अपकर्षतीव ॥ (मु.न.)

वाक्यपदीयम्

भर्तृहरिप्रणीतम् । का. वा. अभ्यङ्कर - वि. प्र. लिमये - इत्येताभ्यां संपादितम् । पूने विश्वविद्यालयसंस्कृत-प्राकृतमाला - २/१९६५. रू. २५.

अद्य वाक्यपदीयविचारविषये सर्वत्रैव संस्कृतप्रपञ्चे महती प्रवर्धमाना च श्रद्धा वरीवर्ति । सवृत्तिकस्य तस्य ग्रन्थरत्नस्य परिष्कारे संपादने अनुवादे आङ्ग्लादिभाषया व्याख्याने च बहवो विज्ञा अद्य प्रवृत्ता दृश्यन्ते । एतस्य नूतनसंपादनस्य संपत्त्यर्थं न केवलं पूर्वं मुद्रितानि वाक्यपदीय-संस्करणानि, किन्तु नूतनाः सप्त मातृकाश्च उपयुक्ताः ।

अत्र मुख्यतया संपादनस्यास्य वैशिष्ट्यमादधानोंऽशः अन्ते योजिता सप्त अनुबन्धाः । येषु अनुबन्धेषु ग्रन्थान्तरेषु शास्त्रचर्चासु दृश्यमानानि हरिवाक्यानि, वाक्यपदीये तत्त्वोपज्ञव्याख्याने चोपलभ्यमानानि अनुपलभ्य-

मानानि च, विशिष्य भोजदेवेन शृङ्गारप्रकाशे उपात्ता भागाः, तत्सर्वं संकलय्य दत्तं शास्त्ररसिकानां विमर्शकानां महत उपकाराय कल्पते । पञ्चमानुबन्धार्पित-वाक्यपदीयस्थविशिष्टशब्दसूची च किमपि मुख्यत्वमावहति । मुद्रणादिकं स्पष्टं स्थूलं मनोज्ञं च । सर्वप्रकारेण अभिनन्दनीयमिदं प्रकाशनम् ॥ (वे. रा.)

धातुकाव्यम्

नारायणभट्टप्रणीतम् । व्याख्याद्वय-सहितम् । डा० श्री एस्. वेङ्कटसुब्रह्मण्य अय्यर्, केरलविश्वविद्यालयसंस्कृतविभागप्रकाशनम् - ६ । १९७०. रू. १०.

धातुकाव्यमिति नामत एव विदितविषयविशेषमिदं काव्यं प्रसिद्धैस्सर्व-तन्त्रस्वतन्त्रैः नारायणभट्टपादैः प्रणीतम्, सर्गत्रयात्मकं च । श्रीवासुदेव-रचितस्य धातुकाव्यस्य पूरकत्वेन सन्दब्धम् । वासुदेवनारायणकृतावुभावपि भागौ संहत्य पूर्वं (१९१५ ईश.) काव्यमालायां दशमगुच्छके प्रकाशितौ ।

नारायणभट्टकृतो भागोऽत्र नूतनतया बहुमातृकापरिशोधनपूर्वं कृष्णार्पण-रामपाणिवादीयव्याख्याद्वयेन सहाद्य यत् प्रदत्तं तदस्य ग्रन्थस्य उपयोगितां भूयोऽपि वर्धयति । अनयोः व्याख्यानयोः प्रथमनिर्दिष्टं पूर्वं काव्यमालायां मुद्रितम्; अन्यत्तु सुप्रसिद्धरामपाणिवादकविकृतम् इदंप्रथमतया प्रकाशितम् । सम्पादकेन सोदाहरणधातुसूची या अत्रायोजिता, सापि महत उपकाराय भवति । एवमन्येऽपि श्रीनारायणभट्टग्रन्थाः संपादकेनानेन परिष्कृत्य प्रकाशयिष्यन्त इति विश्वसिमः ॥ (वे. रा.)

कामधेनुः (प्रथमो भागः)

एरनेल्लूर् भरत पिषारटि, भारतविद्यापीठम्, षोरनूर्, केरलप्रदेशः । १९६९ । रू ३-००.

व्याकरणजटिले संस्कृते परसहायं विना अनायासेन सामान्यव्युत्पत्ति-सम्पादनाय चत्वारिंशद्दिनसाध्याध्यापनपरिपाट्यां प्राथमिकोऽयं पाठ्यग्रन्थः 'कामधेनु'नामकः एरनेल्लूर् भरतपिषारटिमहाशयेन विरचितः । आङ्ग्ल-हिन्दी-मलयालभाषात्रयेण अत्र प्रतिपादनं वितन्वन्नयं पिपठिषून् संस्कृताध्ययनाय प्ररोचयति । उपोद्घाते अन्तर्भावितं संक्षिप्तं भाषावर्गपठनं, अन्ते संयोजितं

भाषाप्रयोगतारतम्यवीक्षणं अध्येतॄणामुपकारकं भवति । उपेक्षितप्राये संस्कृतपठनपाठने पुनरुज्जीवनाय परिस्थित्यनुकूलः कवेरुत्साहो अनुमोदनार्हः ।
(कु. वे. शे.)

मानसरासकेली

रचयिता महीधर वेङ्कटरामशास्त्री, ए. वै. संस्कृतकलाशाला, राजमहेन्द्री, आ. प्र. । रू. २-५०,

अन्तःकरणतया प्रसिद्धस्य मनसः तत्त्वमधिकृत्य प्राचीनार्वाचीनविद्वद्विरचिता बहवो ग्रन्थाः वर्तन्ते । तान् सर्वानपि सम्यक् परिशील्य मनसः स्थानसञ्चारक्रियास्वरूपादिविषयेषु भिद्यमानं तत्त्वं सकलजनास्वादयोग्ये अन्वर्थाभिधाने हृद्ये पद्यकाव्ये शान्तरसप्रधाने प्रकृते 'मानसरासकेली' नामके प्रपञ्चितवन्तः श्रीमन्तः वेङ्कटरामशास्त्रिणः ।

काव्येऽस्मिन् बाह्यजगदित्यारभ्य कैवल्यजगदित्येतदन्तं प्रथितेषु द्वादशसु प्रकरणेषु मनसः प्राधान्यं यथाक्रमं प्रतिपाद्यते । वस्तुनः शास्त्रीयत्वात् पारिभाषिकपदभूयिष्ठा कवेः शैली तत्र तत्र दुरवगमापि भवेदापातदृष्टीनामित्यत्र नास्ति संशयः । प्रायशः शिखरिणीवृत्तनिबद्धैः उपचतुश्शतैः श्लोकैः प्रवृत्तोऽयं प्रबन्धः कवेः व्याकरणशास्त्रप्रतिभाम्, आयुर्वेदतत्त्ववित्त्वं, तथा साहित्यपरिचयं चासाधारणमाविष्करोति ।

१५, ३६, ४०, ४७, ६८, ७६, ८३, २६४, २६८, २६९, ३०८, ३११, ३१२-तमाः श्लोकाः कवेः सरलरचनापाटवं, रमणीयभावनाप्रतिभां च व्यञ्जयन्ति । एतेन विषयकाठिन्यादेव शैल्या अपि काठिन्यमनिवार्यमासीदिति स्पष्टं भवति ।

मनसः प्राधान्यं प्रभावं च अङ्गीकुर्वतां समेषामपि संस्कृतविदुषां काव्यमिदं नवीनधोरणीनिबद्धं परमामोदं तनोतीति विश्वसिमः । (मु. न.)

भारतीयविद्याभवनम्, चौपाटी रोड्, मुम्बई-७.

१. वेदान्ततत्त्वालोकः जनार्दनकृतः-पण्डितराज ति. अ. वेङ्कटेश्वरदीक्षितैः सम्पादितः ॥ १९६९. रू. ८.

२. स्याद्वादमुक्तावली जैनविशेषतर्कापराभिधा. भावसप्ततिका च - श्रीयशस्वत्सागरकृता । श्रीसुरेश उपाध्यायेन सम्पादिता ॥ १९६९. रू. ३.

(१) यशःशेषैः भारतीयविद्याभवनीयसंस्कृतशिक्षाप्रचारकार्यस्तम्भभूतैः वेदश्रौतमीमांसावेदान्तविद्वद्वरैः श्रीवेङ्कटेश्वरदीक्षितैश्चिरात्परिशील्य सम्पादितोऽयं वेदान्ततत्त्वालोकग्रन्थः तेषामेव जीवितकाले न प्रकाशमभजदिति शोचनीयोऽयं विषयः । तत्त्वालोककर्ता जनार्दनः, तस्य आश्रमस्वीकारानन्तरं आनन्दगिरित्वम्, तद्गुरुरनुभूतिस्वरूपाचार्यः, अनुभूतिस्वरूपाचार्यस्य कृतयः, तत्कृतप्रकटार्थविवरणस्य तत्त्वालोकस्य च मिथःसम्बन्ध इत्याद्येषु विमर्शविषयेषु यद् वक्तव्यं तदितो बहुवर्षेभ्यः पूर्वमेवास्माभिः वितत्य प्रदर्शितम् ।

तत्त्वालोकोऽद्वैतदृष्ट्या न्यायवैशेषिकयोः खण्डनपरः । यदि उपलभ्यमानया प्रज्ञानानन्दव्याख्यया सह, तथा एतादृशग्रन्थान्तरसमन्वयव्यतिरेकविचारैः सह ग्रन्थस्यास्य प्रकाशनमुपबृंहितमभविष्यत्, तदा इतोऽपि शोभनतरमभविष्यत् ॥ (वे. रा.)

स्याद्वादमुक्तावली नाम श्रीमद्भिः उपाध्यायैः इदंप्रथमतया सम्पाद्य प्रकाशिता । एकामेव मातृकामादाय प्रकाशिता । क्रि. १६६५-१७०. वर्षेषु भुवमलङ्कृतवता ग्रन्थकृता यशस्वत्सागरेण विद्यासागरेण बहुषु प्रस्थानेषु बहवो ग्रन्था विरचिताः । अत्र जैनतर्कप्रक्रियाप्रतिपादके लघुग्रन्थे जैनसम्मतपदार्थजातप्रदर्शनं, स्याद्वादस्य स्वरूपं, प्रत्यक्षानुमानयोश्च जैनदर्शनानुसारं प्रसाधनं च सरलैः पद्यैः कृतम् ।

अस्मिन्नेव सम्पुटे यशस्वत्सागरकृतं ग्रन्थान्तरमपि प्रकाशितम् ।

भावसप्ततिकानाम्नी कृतिरियमपि अत्रेदंप्रथमतया प्रकाशं नीता । मातृकात्रयबलेन सम्पादिता । इयं ७२-पद्यात्मिका कृतिर्ग्रन्थकर्तुः ज्योतिःशास्त्रपरिश्रमं प्रदर्शयति ॥ (वे. रा)

संस्कृत-अकाडमी, ओस्मानियविश्वविद्यालयः, हैदराबाद्-७. आ. प्र.

डा० आर्येन्द्रशर्मभिस्तत्सहकारिभिश्च संपादिता ग्रन्थाः—

१. काशिका-प्रथमो भागः-१-४ अध्यायाः १९६९. रू. २५.

२. गीतगोविन्दम् टीकात्रयोपेतम् । १९६९. रू. १४.

३. वृत्तरत्नाकरः-टीकाचतुष्टयोपेतः । १९६९. रू १२.

(१) काशिकानाम्न्याः सूत्रवृत्तेः पाणिनीय-संस्कृतव्याकरणग्रन्थपरम्परायां यत्प्राधान्यं तद्विदितमेव । सव्याख्या काशिका बहुभिर्यथासंभवं परिशील्य प्रकाशितैव पूर्वम् । तथापि बहुमातृकासंवादनेन प्रयत्नविशेषमालंब्य तस्या मूलमात्रस्य या परिष्कृतिरत्र समर्पिता सा इदंप्रथमा । तादृशवैशिष्ट्येन प्रकाशमानस्यास्य प्रोत्साहका व्यतिकरा बहवः । अष्ट मातृका उपयुक्ताः । प्रसिद्धैः व्याकरणनिष्ठैः लेबिष् - नामभिः पाश्चात्यविद्वद्भिः स्वकीये काशिकापुस्तके यानि पाठान्तराणि लिखितानि, तान्यप्यत्र डा० खत्रे महाशयानां साह्येन अस्मिन् कार्ये उपयुक्तानि । वृत्तावन्तर्भूतानामवधानार्हाणां विषयानां सुलभग्रहणार्थं मुद्रणोपाया उपात्ताः । महाभाष्य-सिद्धान्तकौमुदीभ्यां सह संवादार्थं तदुपयोगिनः संख्यादिनिर्देशा आदृताः । वृत्तावुदाहृतानां वाक्यानामाकराणां नामानि यावच्छक्ति योजितानि । विषयानुक्रमणी च विभज्य विस्तृता संकल्पिता । एतत्सर्वं काशिकाध्यायिनां तथा तदध्यापकानां च महत उपकाराय नूनं भवेत् । अस्य प्रकाशनस्य द्रव्यव्यये साह्यं वितीर्णं केन्द्रीयसंस्कृतसमित्या ॥

(२) गीतगोविन्दम् प्रकाशितमेव, तथा काश्चन तट्टीकाश्च । अस्य प्रकाशनस्य वैशिष्ट्याय कल्पमाना इदंप्रथमतया अत्र प्रकाशिताः तिस्रः टीका वनमालिभट्टकृता संजीवनी, मातृकापञ्चकाधारेण मुद्रिता; नारायणपण्डित-रचिता पदद्योतनिका मातृकाचतुष्टयाधारेण मुद्रिता; कृष्णकृता जयन्ती मातृकामेकामवादाय मुद्रिता । प्रथमोद्दिष्टायां टीकायां शृङ्गाररसविषयाः विस्तरेण परिशीलिताः, अन्तोद्दिष्टायां शब्दार्थालङ्काराः । नारायणटीकायां श्लोका अधिका दृश्यन्ते सव्याख्याः, येषु एक एव अन्यत्र सञ्जीवनी-पाठेऽप्युपलभ्यते । एते च श्लोकाः 'पञ्चरत्नस्तबक' इति नाम्ना अन्ते अनुबन्धत्वेन मुद्रिताः ॥ (वे. रा.)

(३) वृत्तरत्नाकरः केदारभट्टकृतश्छन्दोग्रन्थेषु प्रथितो बहुशो मुद्रितश्च । अस्मिन् प्रकाशने याष्टीकाः चतस्रो मूलेन सह मुद्रिताः ताः पूर्वं पृथक् पृथक् मुद्रिता एव; किन्तु ता अत्र एकस्मिन्नेव सम्पुटे पठनसौकर्यार्थं निवेशिताः ।

ओ० यूनिवर्सिटी संस्कृतपरिषदः संस्कृतसेवा वर्धतामित्याशास्महे ॥

(वे. रा.)

नारायणीयम्

नारायणभट्टपादः । गुरुवायूर् देवस्व-प्रसिद्धीकरणम्, गुरुवायूर्, केरलः । रू. १-१५०.

श्रीमद्भागवतसारसर्वस्वभूतं नारायणभट्टपादकृतं 'नारायणीयं' नाम स्तोत्ररत्नं सर्वजनसुविदितम् भक्तिमाधुर्यनिष्यन्दिकाव्यगुणसंपन्नमिदं स्तोत्रं सर्वरोगनिवारणद्वारा जनानां भगवद्भक्तिमभिवर्धयन्ती विराजते ।

इदं च स्तोत्रं बहुशः प्रकाशतां गतम् । किंतु विशिष्य केरलीयानां नित्यपारायणाय मलयाललिप्यां मुद्रापितं, प्रसिद्धपण्डितमण्डल्या संशोधितं, गुरुवायुपुरेशसन्निधौ नचिरात् संपन्ने अधिवेशने श्रीमतां कविकोकिल-सकलकलाकलाप-विद्वत्कवीन्द्रादि-बिरुदभूषितानां डा. वे. राघवमहाशयानां करकमलैः प्रकाशितं च । देवस्वाधिकारिभिः कृतोऽयमुपहारः सर्वथा श्लाघ्यः ॥

(कु. वे. शे.)

गीतगीर्वाणम्

श्री. भि. वेलणकरः, सुरभारती, भोपाल् । रू. ५.

संस्कृतभाषायां यद्यपि सर्वं सङ्गीतशास्त्रं निबद्धं, यद्यपि च आजयदेवं संस्कृतगीतप्रबन्धाः प्रथन्ते, तथापि उत्तरापथे हिन्दुस्तानी-गायकैः बहूनि संस्कृतगीतानि गानगोष्ठीषु नैव गीयन्ते । तत्र सरलसरससंस्कृतगीतानां दुर्लभतैव कारणमिति तद्दारिद्र्यपरिजिहीर्षुभिः सुविदितबहुरूपकनिर्माणव्यसनिभिः श्रीवेलणकरमहोदयैः सन्दृब्धा एते गीतप्रबन्धाः गीतगीर्वाणनाम्नि पुस्तके सस्वरविन्यासं प्रकाशिताश्च । सन्त्यत्र ५३ गीानि ५० रागैः निबद्धानि । एतानि च गीतानि द्वित्राण्यपहाय प्रायः सर्वाण्येव वेलणकर-महाशयैः पूर्वं प्रकाशितेषु स्वीयरूपकेषु उपयुक्तान्येव । एतैश्च उपोद्घातोद्दिष्ट-प्रकारेण ५०० गीतानि अद्य यावद् निबद्धानि ।

पुस्तकेऽस्मिन् रागलक्षण-स्वर-चार-सहितं गीतानां सस्वरं मुद्रणं कृतम् । गीतशास्त्रविषयप्रदर्शिनोऽनुबन्धाश्च योजिताः । वेलणकराणां संस्कृतप्रचारार्थमादृतो बहुमुखो व्यवसायोऽभिनन्दनीयो विजयताम् ॥ (वे. रा.)

श्रीरामकृष्णभागवतम्

पण्डितरामसुन्दरभक्तितीर्थेन रचितम् । श्रीकाशीनाथशास्त्रि-भट्टाचार्येण प्रकाशितम् (५६/४, ग्रेस्ट्रीट्, अरविन्दसरणिः, कलकत्ता-६) । १९६६. रू. १५.

प्रसिद्धपण्डितवंशप्रसूतैः अशीतिवर्षवयस्यपि अध्यापनग्रन्थविरचनादिभिः संस्कृतोद्योगयोगनिरतैः श्रीरामेन्द्रसुन्दराभिधैः पण्डितवर्यैः विरचितमिदं ५०००-पद्यात्मकं महाकाव्यं शोभते; शोभतेतरां तदीयविषयगौरवेण च । महाकाव्यस्यास्य नायकाः सुविदिताः ईश्वरसाक्षात्कारसिद्धिसंपन्ना जीवन्मुक्ताः, विवेकानन्देषु स्वशिष्यभूतेषु स्वामाध्यात्मिकीं शक्तिं संक्रमय्य तद्द्वारा आधुनिकप्रपञ्चे भारतीयाया आत्मविद्यायाः पुनरुज्जीवयितारो महात्मानः श्रीरामकृष्णपरमहंसाः । तेषां जीवितप्रभावादिवर्णनेन पावितोऽयं ग्रन्थः । तथा तैस्सह तत्सहधर्मचारिणी शारदादेवी, तच्छिष्या विवेकानन्दाः, एवं तत्सम्बद्धा अन्येऽपि महापुरुषा महाकाव्येऽत्र क्रोडीकृता इति ऐतिहासिककाव्यत्वेन चास्य ग्रन्थस्य गरिमा प्रथते । पण्डितैर्ग्रन्थकृद्भिरुपदेशा ये रामकृष्णीया अत्र अन्तर्भाविताः, तेषां सांप्रदायिकवेदान्तशास्त्रैककण्ठ्यमपि प्रदर्शितम् । वङ्गाङ्ग्लभाषाद्वयानुवादावपि पुस्तकस्य प्रचाराय योजितौ । प्रकाशनमिदं केन्द्रीयसंस्कृतसमिति-साहाय्येन निर्वर्त्तितम् ॥ (वे. रा.)

श्रीरामकृष्णकर्णामृतम्

ओट्टूर् उण्णि नम्पूतिरि, तुलसीवनम्, मायन्नूर् पोस्ट्, ओत्तप्पालम्, केरलः, १९६३ । रू १-२५.

करालेऽस्मिन् कलौ संसारपङ्कनिमग्नानां जनानां समुद्धरणोपायं सरलमुपदिशन्ति श्रीमद्रामकृष्णपरमहंसवाग्विभवाः इति सर्वजनविदितम् । यत्प्रभावप्रभाविताः श्रीमद्विवेकानन्दाः हैन्दवं तत्त्वं जगतः प्रतिबोधयन् भारतस्य आत्मीयभावनायाः अप्रतिमं महत्त्वं प्रत्यपादयन् । दशसर्ग-परिमितेऽस्मिन् 'रामकृष्णकर्णामृत'मिति लघुग्रन्थे तद्भक्ताग्रेसरैः ओट्टूर् नम्पूतिरिपादैः जगन्मान्याः पुण्यश्लोकाः श्रीमद्रामकृष्णपरमहंसाः उपश्लोकिताः । अत्रत्यानि पद्यानि ललितपदविन्यासेन मधुराणि सुबोधानि च । सहृदयानां विशिष्य रामकृष्णशिष्याणां हृदयावर्जकमिदं स्तोत्ररत्नम् ॥ (कु. वे. शे.)

टाल्स्टाय्-कथासप्तकम्

डा० भागीरथीप्रसादत्रिपाठी । चौखाम्बा विद्याभवनम् , वाराणसी-१ । १९७०. रू. ३-५०.

प्रख्यातस्य रूस-साहित्य-सार्वभौमस्य टाल्स्टाय्-अभिधानस्य धर्मोपदेशिका या लघ्व्यः कथाः तासु सप्त अत्र अनूद्य दत्ताः । अनुवादशैली समीचीना भाति, तथापि ईदृशीनां कथानां बालोपयोगिनीनां निबन्धः इतोऽपि सरलतरया रीत्या सुबोधतरैः शब्दैः संदृब्धव्यः ॥ (वे. रा.)

श्रीमाता, दुर्गास्तोत्रम्

अरविन्दयोगिनां कृत्योः संस्कृतानुवादः । अनुवादको जगन्नाथो वेदालङ्कारः । अरविन्द-सोसइटी, पाण्डिच्चेरि-२ ।

सुप्रसिद्धानां योगिनामरविन्दघोष्-नामधेयानाम् आङ्ग्लभाषामयानां लेखानां संस्कृतानुवादाः श्रीमता जगन्नाथेन विरचिताः; संस्कृतप्रतिभायामेव पूर्वं केचनात्र मुद्रिताः । अद्यैतेषां पृथक् पुस्तकरूपेण प्रकाशनं केन्द्रीयसंस्कृतसमितिसाह्येन प्रवर्तते । प्रथमनिर्दिष्टे पुस्तके 'The Mother' इत्यस्य लेखः संस्कृतगद्यरूपेण उपहृतः । अनन्तरनिर्दिष्टे अरविन्दकृतं दुर्गास्तोत्रम् अनुष्टुप्च्छन्दसा लघुव्याख्यया सह प्रदत्तम् ॥ (वे. रा.)

"यथा ते रोचते"

अनन्तत्रिपाठिशर्मभिः सन्दृब्धा । मनोरमाकार्यालयः, शिरोमणिमुद्राशाला, ब्रह्मपुरम् - गञ्जम , उत्कलप्रदेशः । १९६९. रू. ३-५०.

श्रीमतां संस्कृतप्रचारकार्यनिरतानामनन्तत्रिपाठिशर्मणां 'मनोरमा' - नाम्नीं पत्रिकां, तैरुपक्रान्तं षेक्स्पियर्-नामकानां आङ्ग्लसाहित्ये प्रसिद्धानां नाटककविसार्वभौमानां सर्वेषामेव रूपकानां संस्कृतानुवादरूपं महत् संस्कृतपरिपोषणकार्यं चाधिकृत्य पूर्वमेव प्रतिभायां विमर्शः प्रकाशितः । अस्यां संस्कृतषेक्स्पियर्-मालायामद्य "As You Like It" इति रूपकस्यानुवादः परिसमाप्य पृथक् पुस्तकरूपेण प्रकाशितः ।

इदं च पुस्तकं प्रतिभासम्पादकानां स्वयं कवीनां नचिरादत्र पण्डित-मण्डल्या "विद्वत्कवीन्द्र" इति बिरुदेन भूषितानां डा० वे. राघवमहाशयानां गौरवार्थं तेभ्य उपहारीकृतं, तद्विषयकप्रशस्तिश्लोकैः तत्प्रतिकृत्या च योजितं शोभतेतराम् ॥ (कु. वे. शे.)

महात्मगान्धिविषयकानि प्रकाशनानि

(१) भारतस्वातन्त्र्यम्

स्वातन्त्र्येतिहासस्य सप्ताध्यायी । लेखकः-वामनकृष्णचितळे । शारदा-श्रमविद्यामन्दिरम्, भवानीशङ्करपथः, मुम्बई-२८ । १९६९. रू. ४-२५.

अद्य कीर्तिशेषा एते लेखका श्रीचितलेमहाशयाः स्वातन्त्र्यलाभार्थं भारते य उद्योगः प्राचलत्, तस्य कथां पूर्वपीठिकया प्रस्तूय विवेकानन्दयुगम्, बा. ग. टिलकयुगम्, म. गान्धियुगम्, ज. नेहरूयुगम् इति चतुर्युगात्मकतया विभज्य ऐतिहासिकान् विषयान् कानप्यविहाय सन्दृब्धवन्तः । श्लाघास्पदमिदं विशेषेण यदेते, सर्वमिदमाख्यानकं गद्यशैल्या सरलया विरचयन्तः आधुनिक-संस्कृतगद्यसाहित्यसमृद्धिं समपोषयन्निति ॥

(२) मागधम्-गान्धिदर्शनम् ।

संस्कृतप्राकृतविभागः, एच्. डि. जैन कालेज्, आरा, बिहारप्रदेशः ॥

आरास्थजैनकलाशालासंस्कृतप्राकृतविभागेन तदा तदा प्रकाश्यमानेयं शोधपत्रिका 'मागधम्' नाम । अस्याः तृतीयोऽयमुदयः म.गान्धिनां शताब्दी-महोत्सवमधिकृत्य उपहारीकृतः । अत्र सर्वे लेखा महात्मनां चरित्रचारित्रादि-सत्याग्रहः, तदुपदेशभूता अभिप्रायाः-तान् सर्वान् विचारयन्ति । प्रथमं संपादकैरेव विपुलेन सन्दर्भेण गान्धिविषयकं सर्वमेवालोडितं दृश्यते । गान्धिसंमतमर्थशास्त्रम्, चर्खादर्शनम्, शिक्षादर्शनम्, ईश्वरदर्शनम्, इत्यादयो विषया लेखकान्तरैः पृथक् पृथक् स्वस्वलेखैः परिशीलिताः । अत्रापि सर्वे लेखा गद्यमया एव ॥

(३) शारदा ।

४२५ सदाशिवपेट्, पुण्यपत्तनम्-३० । नवम्बर-डिसम्बर १९६९.

अस्या अपि पत्रिकायाः प्रायो भूयान् भागः गान्धिशताब्द्यां महात्मस्मारकतया आयोजितः । अत्र प्रकाशितेषु विविधेषु गद्यपद्यात्मकेषु लेखेषु पं.पण्डरीनाथशर्मपाठकेन गद्यरूपेण यन्महात्मचरितं समर्पितं, तत् विशेषेण निर्देशमर्हति । महात्मसम्बन्धी चित्रानुबन्धोऽपि अत्रान्तर्भावितः ॥

(४) पाटलश्रीः

पटना-राजकीय-संस्कृत-महाविद्यालयः, पटना-४. ४. २. एप्रिल् १९६९.

अस्यां पत्रिकायां आचार्यश्रुतदेवशास्त्रिणां नूतनं श्रीगान्धिचरितमेकं प्रस्तुतं क्रमशः प्रकाश्यमानं दृश्यते; महात्मनो माहात्म्यम् अनन्तसाहित्यनिर्माणप्रेरकत्वं स्पष्टयति । अतीव सरला शैली, लघूनि च गद्यवाक्यानि ॥

(वे. रा.)

श्रीनेहरूचरितम् (महाकाव्यम, हिन्दी-अनुवादसहितम)

ब्रह्मानन्दशुक्लः, शारदासदनम्, ३८, राधाकृष्णः, खुर्जा, उत्तरप्रदेशः । १९६९ । पुस्तकालयसंस्करणम् रू. १२-०० साधारणसंस्करणम् रू. १०-००.

विश्वविख्यातस्य भारतकर्णधारस्य दिवङ्गत-पण्डित-जवाहरलालनेहरू-महाभागस्य पावनं चरित्रं वर्णयदिदं महाकाव्यं अष्टादशसर्गपरिमितं हिन्दी-अनुवादसहितं 'श्रीनेहरूचरित'नामकं श्रीब्रह्मानन्दशुक्लमहाशयैः महाकाव्य-लक्षणानुरोधं सरससरलगभीरं संग्रथितमस्ति । कवेः ललितपदविन्यासः सन्दर्भाक्लिष्टता च काव्यस्य सौकुमार्यं द्विगुणयति । निसर्गसिद्धः कवेः प्रतिभाविशेषः काव्यमुत्तेजयन् पाठकान् आवर्जयति । कृष्णकान्तशुक्लेन विरचिता 'प्रियंवदा' नाम्नी श्लाघ्या हिन्दीटीकापि आयोजितात्र । नूतनं विषयमवलम्ब्य संस्कृतचरित्रकाव्यविभागस्य पोषणे संरक्षणे च प्रवृत्तानां कविरत्नानां श्रीब्रह्मानन्दशुक्लानां परिश्रमः सहृदयाभ्युपगम्यो भवति । ग्रन्थकृतां नचिराद् वृत्तेन तिरोधानेन संस्कृतसाहित्यप्रपञ्चः दूनो दीनश्च सञ्जातः ॥

(कु. वे. शे.)

श्रीचन्दनमुनीनां कृतयः

(१) उपदेशामृतम् (२) ज्योतिःस्फुलिङ्गः (३) अर्जुनमालाकारम् ।

प्राप्तिस्थानानि - (१) अणुव्रतसमितिः, राजहंसभवनम्, मेरैन् डैव्, मुम्बई-२ ॥ (२) (३) शान्तिभवनम्, ६४, ए. एम्. लेन्, चिक्पेट्, बङ्गलूर्-२A.

उपरि निर्दिष्टानां तिसृणां कृतीनां निबन्धारः प्रसिद्धानामणुव्रत-व्यवस्थापकानां श्रीमदाचार्यतुलसीमुनीनां शिष्येष्वन्यतमाः ।

प्रथमोद्दिष्टे उपदेशामृते षोडशचषकैः आध्यात्मिकसमुन्नत्युपायभूताः तत्त्वोपदेशाः समर्प्यन्ते ।

सम्यग्दर्शनम्, अन्तर्मुखता, आत्मपरीक्षा, स्वान्तःशत्रूणां निरसनम् इत्यादीनामावश्यकता सरलसुभगैः अनुष्टुप्-श्लोकैः प्रदर्श्यते । मुनीनां विशाला प्रेक्षा १.१३-तम-श्लोके स्पष्टा दृश्यते-

भिन्नत्वात्संप्रदायानां न तत्त्वं भिद्यतेतराम् ।
नानादेशसमुत्पन्नं किं स्वर्णं स्वर्णतां त्यजेत् ॥ इति ।

ज्योतिःस्फुलिङ्गाः ५६-संख्याकाः आत्मशक्तितेजसो विस्फुटिता द्योतन्ते । एतन्नामके पुस्तके लघूनि गद्यमयान्यनुशासनानि मननाचरणोपयोगीनि सङ्कलितानि । 'अधुनैव आरभस्व', 'विषमपि पीयूषे परिणमय', 'समय एव करोति बलाबलम्', 'नित्यं नवीनो भव', इत्यादिशीर्षका एते उपदेशाः बहुपौनरुक्त्यसहाः प्रहतमपि विषयमाधुनिकदृष्ट्या आधुनिकेभ्यः हृदयस्पर्श-कतया ददति ॥

अर्जुनमालाकारकथा जैनसाहित्ये सुविदिता । सात्र चन्दनमुनिभिः परिमितेन ५८-पत्रात्मकेन गद्यबन्धेन नूतनकाव्यत्वेन धार्मिक-सामाजिक-नीत्यादिबोधकैः अनतिविस्तरैर्वर्णनैः छात्रोपयोगितया विरचिता हिन्दी-अनुवादेन च प्रकाशिता ॥

अन्या अपि त्रयोदश कृतयो मुनिभिः संस्कृतभाषया निर्मिताः, प्राकृतभाषया च अन्याः काश्चन ।

शैल्या विषयेन च चन्दनवत् तापहारि भोग्यं च भवति श्रीचन्दनमुनीनां साहित्यम् ॥ (वे. रा.)

कालिदाससम्पुटः

डि. आर्. एम्. कालेज्-संस्कृतसमितिः, दवङ्गरे-२ । सम्पादकः मल्लिकार्जुनपरड्डि ।

अस्मिन् तनीयसि संग्रहे महाकविमधिकृत्य संस्कृत-कन्नड-आङ्ग्ल-निबन्धाः प्रकाशिताः। एधतां समीचीन उत्साहोऽयं छात्राणामध्यापकानां च ॥ (वे. रा.)

त्रिपुरदाहकथा (गद्यकाव्यम्)

रामस्वरूपशास्त्री भूतपूर्वाध्यक्षः, अलीगढविश्वविद्यालयः । रू. १-५०.

गद्यकाव्ये शास्त्रिणां प्रयत्नः विशिष्य प्रशस्यः । कथेयम् आरम्भ एव कादम्बरीमनुस्मारयन्ती प्राचीनगद्यकाव्यपरम्परायाः अविच्छेदमुद्घोषयन्ती विजृम्भते । श्रीरामस्वरूपशास्त्रिविरचिता त्रिपुरदाहकथा प्रौढसन्दर्भेण, अर्थगौरवेण, भावगाम्भीर्येण, अनुप्रासेन च परिलसन्ती सहृदयानावर्जयति नूत्नानां पदप्रयोगाणां साधुत्वसमर्थने तैरेव दत्ता अधोलिखिता टिप्पणी बहूपकरोति ।

त्रिपुरासुरैः कृतदुरवस्थस्य स्वर्गस्य वर्णने (१८-१९), कैलासपुरवर्णने (२०-२७), त्रिपुरासुरपुरत्रयीवर्णने (२९-३३) च विशिष्य तेषां रामस्वरूप-शास्त्रिणां सर्वाङ्गीणपाण्डित्यधोरणी परिस्फुरति । इतिहासप्रसिद्धम् ईश्वरकृतं त्रिपुरदाहमवलम्ब्य विरचितमिदं गद्यकाव्यम् ॥ (कु. वे. शे.)

स्तोत्रमाला

श्री श्रीकृष्णप्रेमिविरचिता । प्रकाशकः श्री. टि. सि. श्रीनिवासः, अध्यक्षः, प्रेमिकग्रन्थप्रकाशकसभा, परनूर् मुगयूर् (मार्गः) एस्. ए. जिल्ला, तमिळ् नाड् । मूल्यमनिर्दिष्टम् ।

अष्टाचत्वारिंशत्स्तोत्राणां सङ्ग्रहभूतः 'स्तोत्रमाला'-नामकोऽयं लघुग्रन्थः श्री श्रीकृष्णप्रेमिणा विरचितः । अत्र विद्यमानानि स्तोत्राणि

सरलपदविन्यासललितानि भक्तजनमनःप्रह्लादीनि विलसन्ति । प्रेमिग्रन्थ-प्रकाशकसभाध्यक्षैः कृतोऽयं व्यवसायः जनानां भगवद्भक्त्युत्पादनद्वारा लोकमङ्गलमातनोति । (कु. वे. शे.)

प्राची

वाराणसेयसंस्कृतविश्वविद्यालयच्छात्रपरिषदो वार्षिकी पत्रिका । संवत् २०२६.

संस्कृतपत्रिकासु अभिनवेयमर्हत्यस्माकं स्वागतम् । संस्कृतप्रेम्णा च संस्कृतविश्वविद्यालयप्रतिष्ठापनमूलकारणभूतत्वेन च स्वयशःकायं स्थिरी-कृतवतां श्रीसंपूर्णानन्दमहाशयानां स्मारकत्वेन पत्रिकाया अस्याः प्रथमा सञ्चिका यत् प्रकाशिता तदौचितीं परमामावहति ।

अत्र नानाशास्त्रस्पर्शिनः १५ लघुनिबन्धाः अन्तर्भूताः । छात्राणामद्यत्वे सुलभेषु विद्यार्जनप्रतिबन्दिषु विविधेषु विक्षेपेषु येयं संस्कृतपत्रिकाप्रकाशन-व्यसनिता तैः प्रदर्श्यते सा सुतरामभिनन्दनीया, विश्वविद्यालयाधिकारिभि प्रोत्साहनीया च ॥ (वे. रा.)

प्रतिभा

वारणसेयसंस्कृतविश्वविद्यालयसाहित्यपरिषदो वार्षिकी पत्रिका । वाराणसी । संवत् २०२७.

अत्र विश्वविद्यालयीयाध्यापकानां तथा तच्छात्राणां च नैकविषय लघुलेखाः, कविताविलासाश्च प्रकाशिताः । चर्वितचराणि, तथा च नूतनानि वस्तून्यादाय लिखिता एते लेखाः । छात्राणामुत्साहवर्धापिकेयं वार्षिकी सञ्चिका इतोऽप्यधिकगुणविशेषभूयिष्ठा अनुस्यूतप्रयत्नपरिरक्षिता महते सौभाग्याय कल्पताम् इत्याशास्महे ॥ (वे. रा.)

सुरभारती

वटोदर-संस्कृतमहाविद्यालयपत्रिकायाः वार्षिकोऽङ्कः । वटोदरा-६ । १९६९.

विद्यालयाध्यक्षैः मेहटा-महाशयैः सम्पादितेयं वार्षिकी सञ्चिका । ३१ निबन्धैः प्रकाशते । महात्मा गान्धी, धर्मशास्त्रम्, ज्योतिःशास्त्रम्, वेदान्तादि-

दर्शनानि, गीता, पुरावस्तुविद्या, देवतातत्त्वम्, व्याकरणम्, साहित्यम्, नूतनकाव्यनिर्मितिः-इति विविधैर्विषयैः परिपूर्णा पत्रिकेयं प्रथते ॥ (वे. रा.)

विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः-रचयिता डा० वे. राघवः। "पुनर्वसु", ७. श्रीकृष्णपुरवीथी, रायपेट्ट, मद्रास् १४. मूल्यं रूप्यकत्रयम्।

प्रतापरुद्रविजयः अथवा विद्यानाथविडम्बनम् इति नाम्ना विशेषितोऽयं रूपकविशेषः संस्कृतनाटकरङ्गे नूतनां भूमिकां गृह्णन् समवतीर्णो विलोक्यते। अयं हि डाक्टर्. वे. राघवस्य कविकोकिलस्य पञ्चमोदञ्चनेषु अतिमधुरं अन्यतमं कूजनम्। तस्य कवयितुः अपरिणत एव वयसि परिणतया प्रतिभया समाकलितमिदं रूपकं समुद्भासयति संस्कृतनाटकलोकमिति नेयमतिशयोक्तिः। विविधरूपकप्रणेतुरप्यस्य कवेः इयं कृतिः असाधारणैव। किञ्च अक्षुण्णां कथासरणिं समाश्रयन्त्याः अस्याः संस्कृतरूपकप्रपञ्चे प्राथम्यं परार्ध्यता च परिलसत्येव ॥

तथाहीयंकृतिः प्रतापरुद्रविजयः इत्यभिधानेनैव प्रतापरुद्रस्य त्रैलोक्यविजयं वर्णयतीति बोधामः। विद्यानाथविडम्बनं इत्यपरेण अभिधानेन तु इयं कृतिः प्रतापरुद्रयशोभूषणप्रणेतुर्विद्यानाथस्य कवितां विडम्बयतीत्यवगच्छामः ॥

स हि विद्यानाथः स्वकीये ग्रन्थे वर्णनविषयीभूतं एकशिलानगराधिवासिनं अन्ध्राधिनाथं प्रतापरुद्रं निरर्गलनिर्गलितया अत्युक्त्याप्यतिमात्रया विशिनष्टि शतसङ्ख्याकैः पद्यैः। मधुरा तदीया कविता अम्लानरसभरितापि अत्युक्त्यानया अम्लं रसं निषिञ्चन्ती भावुकानां चेतांसि सङ्कोचयतीति नेदं तिरोहितं प्रतापरुद्रीयपरिशीलिनाम् ॥

परिशीलितप्रतापरुद्रीयः तदत्युक्त्या नितरां निर्विण्णमानसोऽप्ययं कविः सहजया सहृदयतया समुद्बोधितप्रतिभः तद्ग्रन्थगतप्रतापरुद्रकल्याणाख्यनाटकस्य कथामास्पदीकृत्य अन्यैरचिन्त्यरचनं अत्युक्तिमात्रजीवितं कथावस्तु परिकल्प्य रूपकमिदं निर्माय अत्युक्तिप्रवणं विद्यानाथं विनतशिरसं विदधाति। तेन च सहृदयानां चेतसि हास्यं रसं सपरीवाहं प्रवाहयति। आ भूमेः आ द्युलोकं प्रसरत् अस्य कथावस्तु न केवलं धरणीनिलयान् यावत् दिविषदः

तेषामधिपं देवेन्द्रं च विमोहयति किंकर्तव्यतामूढांश्च विधत्ते । अन्ते च भगवता परमेश्वरेणैव निवारणीयो भवति त्रिलोकीक्लेशावहोऽयं संमोहः । अद्भुतोत्तोलितेन हास्यरसविकासेन समुल्लासितस्यास्य कथावस्तुनः परिकलने कविवेधसोऽस्य निर्माणनैपुणी सीमातिगा सञ्चकास्ति ॥

चतुर्भिरङ्कैः परिच्छिन्नेऽस्मिन्नाटके सहृदयहृदयाह्लादकानि अनतिक्रान्तौचित्यानि, वर्ण्यसौन्दर्यसमुल्लासकैः स्थाननिवेशितैः अलङ्कारैः अलङ्कृतानि परिगतप्रसादानि गुणगणभूषणानि प्रकाशन्ते विविधवृत्तबद्धानि पद्यानि । गद्यानि चानाविद्धललितपदसुन्दराणि भावभरितानि श्रोतृजनचेतोरञ्जकानि । पात्राणां सम्भाषणस्य चातुरी माधुरी च प्रेक्षकाणां चेतसस्समावर्जनचतुरा ॥

यद्यप्यत्र पुरातननाटकलक्षणविधायिनां लक्षणानि सम्पूर्णतया समुपलभ्यन्त इति न वयं प्रगल्भामहे वक्तुम्, तथापि सहृदयहृदयप्रसादनमेव काव्यकृत्यम् उत्प्रेक्षमाणानां रसिकानाम् अत्र सर्वथा समादरणीयतैव विलसति । अपि च नातिदीर्घकालप्रयोज्यमिदं रूपकं सामाजिकानां नयनोत्सवो भवेदित्यत्र नास्माकं विशयः ॥

तदेवम् अनवद्यस्य सर्वतो रमणीयस्यास्य रूपकस्य प्रणेतायं सर्वेषां श्लाघामर्हत्येवेत्यस्माकमाशयः ॥

लक्नो-विश्वविद्यालयाध्यक्ष्यं अलङ्कृतवतः के. ए. सुब्रह्मण्यार्यस्य प्रस्तावना, पं. चारुदत्तशास्त्रिणः अभिनन्दनोक्तिश्च नाटकस्यास्य प्राशस्त्यं प्रथयतः ॥ वा. ह. सुब्रह्मण्यशास्त्री

आर्यालहरी

पि. नीलकण्ठशर्मा । ६/५ चर्च् स्ट्रीट्, अरियङ्कुप्पम्, पाण्डिच्चेरि ॥

पि. नीलकण्ठशर्मणा विरचितेयं 'आर्यालहरी'-नामिका लघ्वी पुस्तिका मूकपञ्चशतीमनुस्मारयन्ती भागवतहृदयान्याप्लावयन्ती विराजते । ललितपदगुम्फितमिदं स्तोत्ररत्नं भक्तजनावर्जकं वर्तते ॥ (कु. वे. शे.)

सरस्वतीकार्यम् (शारदाश्रमविद्यामन्दिरम्)

कृ. वा. चितले । शारदाश्रमविद्यामन्दिरं, भवानीशङ्करपथः, मुंबई - २८ । रू. १-०० ॥

शारदाश्रमविद्यामन्दिरसंस्थायाः, अभ्युन्नतिप्रकारमाविर्भावयन्-'सरस्वती-कार्यम्' नाम अयं लघुग्रन्थः दिवंगत कृ. वा. चितले महोदयैः प्रणीतः । संस्थाविद्यालयस्य प्रधानाध्यापकपदमलंकृतवतां लोकमान्यटिलकचरितादि-ग्रन्थकर्तृणां कृ. वा. चितले महाशयानां प्रयत्नेन अभिवृद्धं सरस्वतीकार्यम् एतद्ग्रन्थद्वारा सम्यक् ज्ञायते । कादम्बर्यादिग्रन्थान्तरेषु प्रतिपादितः कथा-भागः (लक्ष्मीमदः इत्यादि) यथौचित्यं सन्निवेशितो दृश्यते (कु. वे. शे.)

शार्दूलशकटम् (प्रकरणम्)

डा. वीरेन्द्रकुमारभट्टाचार्यः संस्कृतसाहित्यपरिषद् १६८/१ राजा दीनेन्द्र स्ट्रीट कलिकता-४ १९६९ । रू. ३-०० ॥

राष्ट्रीयपरिवहणकर्मिणां जीवनमवलंब्य डा. वीरेन्द्रकुमारभट्टाचार्येण विरचितमिदं 'शार्दूलशकटम्' नाम प्रकरणम् । 'कविकालिदासादि'ग्रन्थ-प्रणेत्रा डा० वीरेन्द्रकुमारभट्टाचार्येण श्रमिकजनानां वास्तविकं जीवनम् इतिवृत्तीकुर्वन् सन्दृब्धम् इदं प्रकरणं वस्तुकल्पनरचनावैचित्र्यादि-गुणपूर्णतया सहृदयादरणीयं वर्तते । पञ्चाङ्कघटितेऽस्मिन् प्रकरणे 'आदिशूर' 'श्यामाङ्गा'दि पात्राणां स्वभावचित्रणमतीव हृदयङ्गमं वर्तते । संस्कृतपरिषद्-ग्रन्थमालायां प्रकाशितमिदं सामाजिकनाटकवैरल्यं यद् नवीनसंस्कृतसाहित्ये वर्तते तदपाकरोति ॥ (कु. वे. शे.)

तर्जनी (हिन्दी-अनुवादसहिता)

श्रीदुर्गादत्त शास्त्री । प्रकाशकः-शशी तथा शेषभूषण्, नलेटी, प्रागपुर, कांगडा, (हि. प्र.) संवत् २०२६ । रू. ९-२५.

आधुनिकं राष्ट्रीयमितिवृत्तमाधारीकृत्य एकादशसर्गपरिमितं 'तर्जनी' नामकमिदं मौलिकं काव्यं श्रीदुर्गादत्तशास्त्रिभिः संग्रथितम् । संस्कृते कालानुरोधं नूतनां परिवर्तितां साहित्यप्रणालीमुद्भाव्य संस्कृतसेवानिरतैः प्राप्तराष्ट्रीयपुरस्कारैः श्रीदुर्गादत्तशास्त्रिविद्यालंकारैः काव्यतर्जनीतर्जनेन

समाजदोषनिराकरणे य उद्यम ऊरीकृतः सः श्लाघ्यः। काव्यस्य भाषासारल्यं सोत्साहं पाठकानावर्जयति । आन्तम् अलंकारैः सुभाषितैश्च सुशोभितं वर्तते काव्यमिदम् । भाषान्तरपदानां प्रयोगाधिक्यं कथावस्तुदृष्ट्या अपरिहार्यं भवति । विशिष्य 'मत्पश्चात् किं करिष्यति' इति द्वितीयसर्गस्थरेल-मन्त्रिणां शास्त्रिणां वृत्तान्तः, 'अस्पृश्यः कोऽस्ति संसारे' इति नवमसर्गगत-अस्पृश्यतानिर्वचनं च पठनार्हं मननार्हं च । अन्ते वर्तमानः 'त्यागपत्रं गृहाण मे' इति एकादशः सर्गः कवेः सकलदोषवियुक्तसमाजनिर्माणा-काङ्क्षामभिव्यञ्जयति । (कु. वे. शे.)

OUR CONTRIBUTORS:

अस्यां सञ्चिकायां नूतनतया दृष्टा लेखकाः—

श्री प्रियव्रतशर्मा, एम्. ए., साहित्याचार्यः, वाराणसी-हिन्दुविश्व-विद्यालयः, वाराणसी

SRI PRIYAVRATA SARMA, M.A., Sahityacarya, Banaras Hindu University, Varanasi.

श्री विघ्नेश्वरशर्मा, श्रीक्षेत्रम्, गोकर्णः, मैसूर्

SRI VIGHNESVARA SARMA, Srikshetra, Gokarna, Mysore.

श्री एम्. एन्. जोषी, कर्णाटक आर्ट्स् कालेज्, धार्वार्

SRI M. N. JOSHI, Karnatak Arts College, Dharwar.

श्री दि. म. पाण्ड्यः, दिवान्परा रोड्, भवनगर्, गू. प्र.

SRI D. M. PANDYA, C/o SRI M. C. PANDYA, Dantiawali Sheri, Divanpara Road, Bhavanagar, Gujarat.

श्री कालूरि हनुमन्तराव्, ओस्मानिया विश्वविद्यलयः, हैदराबाद्-७

SRI KALURI HANUMANT RAO, 6UB/F7, New Lecturers' Quarters, Osmania University Campus, Hyderabad-7.

डा० माधवदेशपाण्डे, ५६५, बुधवारपेट्, पूना-२

DR. MADHAVA DESHPANDE, 565, Budhavarpeth, Poona-2.

BHARATIYA VIDYA PRAKASHAN
ORIENTAL BOOKSELLERS & PUBLISHERS
(Dealers in entire range of Indological Publications)
Post Box 108, Kachaurigali, Varanasi-1 (India)

१ पारस्करगृह्यसूत्र - हरिहरभाष्य - हिन्दी - अनुवादसहित पं. हरिदत्तशास्त्री विद्यालङ्कार (यंत्रस्थ)
२ प्रसाद के ऐतिहासिक और संस्कृतिक नाटकों का अनुशीलन- लेखिका - कुमारी माधुरी बाजपेयी रू. १०
३ अभिनवकथानिकुञ्जः सं० प्रं. शिवदत्तशर्मा चतुर्वेदी (संस्कृत में कहानियों का संग्रह) ६
४ प्राकृतचन्द्रिका - श्री शेषकृष्णकृत - सोपज्ञवृत्तिसहित सं श्रीप्रभाकरझा, संशोधक डा० सुभद्रझा १२
५ वैदिक एवं वेदांग साहित्य की रूपरेखा - ले० डा० रामेश्वर प्रसादमिश्र ४
६ ऋग्वेदभाष्यभूमिका (हिन्दीव्याख्योपेता) सायनाचार्य विरचिता- व्याख्याकार डा० वीरेन्द्रकुमारवर्मा ३-५०
७ काव्यप्रकाश (संपूर्ण) अंग्रेजी अनुवादसहित अनुवादक. म. म. डा० सर् गंगानाथझा, एम्. ए., डी. लिट - ४०-००
८ New Vedic Selection by Sri N. K. Nath Sastri Telang & Dr. Braj Behari Chaubey. १६, १२-५०
९ पातञ्जलयोगदर्शन - व्यासभाष्य, तत्त्ववैशारदी तथा योगवार्तिकसहित. सं. श्रीनारायणमिश्र १५
१० पातञ्जलयोगसूत्र - भोजकृत - राजमार्तण्डवृत्तिसहित तथा हिन्दी अनुवाद सहित - अनुवादक - डा. अमलधारी सिंह ७-००
११ न्यायदर्शन - वात्स्यायनभाष्यसहित, हिन्दी अनुवाद के साथ, सं. स्वामी द्वारिकादासशास्त्री १०-००
१२ न्यायकुसुमाञ्जलिः - श्री उदयनाचार्य विरचित श्रीहरिदास-भट्टाचार्य-विरचितया वृत्त्या प्रभाख्यया संस्कृते व्याख्यया विभाख्यया, हिन्दी व्याख्यया च विभूषितः व्याख्याकार - श्रीनारायणमिश्र ५,७
१३ सांख्यसूत्र - विज्ञानभिक्षुभाष्य, तत्त्वसामाससूत्र और सांख्यसारसहित. सं. डा. रामशंकरभट्टाचार्य १२-१०
१४ महाप्रभुश्रीमद्वल्लभाचार्य विरचित-तत्त्वार्थदीप-निबंध का शास्त्रार्थप्रकरण. सं. अनुवादक तथा व्याख्याकार श्री केदारनाथमिश्र १२-००
१५ Navya Nyaya System of Logic (some basic theories & techniques) by Dr. D. C. Guha. २५-००
१६ Soul Theory of the Buddhists—Th. Stcherbatsky. १०-००
१७ Conception of Buddhist Nirvana—Th. Stcherbatsky. ३०-००
१८ Nagarjuna's Philosophy—Dr. V. K. Ramanan (shortly).

OUR LATEST PUBLICATIONS

A Critical Study of Dandin and his Works

By Dr. D. K. GUPTA

The present work, highly admired by the Examiners, Dr. T. Burrow of the Oxford University and Dr. Edwin Gerow of the Rochester University, U.S.A., attempts a literary study of the works of the writer, giving a critical assessment of his contribution to the study of Poetics and to the Classical Sanskrit Prose.

Demy 8vo,xxiv+468 pp. Lib. Edn. Rs. 48
Ord. Edn. Rs. 36

2. कौटलीय अर्थशास्त्र

अनु. उदयवीर शास्त्री

मूल, विस्तृत हिंदी अनुवाद, पद्यानुक्रमणी तथा पारिभाषिक शब्दकोष ।
छात्र संस्करण रू. 21-00
लाइब्रेरी सं० (३ भागों में) रू. 48-00

3. संस्कृत नाटकों में समाज-चित्रण

डॉ० चित्रा शर्मा

भास, कालिदास एवं शूद्रक के नाटकों के आधार पर। रू. 16-00

MEHARCHAND LACHHMANDAS
Oriental Publishers and Booksellers
2736, Kucha Chelan, Daryaganj, Delhi-7

RAMAYANA PUBLISHING HOUSE

1, Judge Jumbulinga Mudaliar Road,
Mylapore, Madras-4

Our Latest English Publications on Itihasas and Puranas

FIFTY HINDU SCRIPTURAL TALES—
Instructive Stories from Puranas in lucid prose Rs. 18

RAMAYANA-TRIVENI—Five Comparative and Critical Studies by Dr. V. Raghavan on the Ramayana of Valmiki, Kamban and Tulasidas Rs. 2

Our well-known M. N. Ramaswamy Iyer Memorial Editions of Srimad Valmiki Ramayana in Sanskrit, Tamil and Malayalam, as also Sriman Narayaneeyam, Srimad Bhagavad Gita, Sri Devi Mahatmya etc. etc. are now available.

Copies can be had also at :

321, Thambu Chetty Street
MADRAS-1

10 G, Edward Elliots Road
MADRAS-4

STATEMENT ABOUT OWNERSHIP AND OTHER PARTICULARS ABOUT SAMSKRITA PRATIBHA

FORM IV

(As required by Rule 8 of Press Registrar's Act)

Place of Publication	..	7, Sri Krishnapuram Street, Madras-14
Periodicity of Publication	..	Half-yearly
Printer's name and address	..	M.L.J. Press Private Ltd., 55-56, Mundakanni Amman Koil St., Madras-4
Publisher's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Editor's Name	..	Dr. V. Raghavan
Nationality	..	Indian
Address	..	7, Srikrishnapuram Street, Madras-14
Owner's Name	..	Sahitya Akademi,
Address	..	Rabindra Bhavan, Ferozeshah Road, New Delhi

I, V. Raghavan, hereby declare that the particulars given above are true to the best of my knowledge and belief.

30-6-1970

V. RAGHAVAN.
Signature of Publisher

'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्ग्यां वा भाल्येको भारतो गुणः ॥

समानं मूलमेतस्याः सम्प्रदायाः समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तराः समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्जगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

सम्पादकः

वे. राघवः

Some of Our Valuable Publications

THE PHILOSOPHY OF SENTENCE AND ITS PARTS by *Dr. Veluri Subba Rao* 1970 Rs. 30 00

INDIA'S NATIONAL WRITING by *Saraswati Saran* Rs. 21 00

THE PISACA LANGUAGES OF N.W. INDIA by *George Abraham Grierson* 1969. Rs. 22 50

PRAKRIT PRAVESHIKA (Introduction to Prakrit) by *Alfred C. Woolner*, translated by *Dr. Banarsidas Jain*, 1968. Rs. 18 50

PALI LITERATURE AND LANGUAGE by *Dr. Wilhelm Geiger*, translated by *Dr. Batakrishna Ghosh*, 1968. Rs. 30 00

BANABHATTA: A Literary Study by *Dr. Neeta Sharma*, Rs. 23 00

THE STUDY OF THE SELF CONCEPT OF SANKHYA YOGA PHILOSOPHY by *Dr. Francis V. Catalina*, 1968. Rs. 15 00

HOBSON-JOBSON. A GLOSSARY OF COLLOQUIAL ANGLO-INDIAN WORDS AND PHRASES, AND OF KINDRED TERMS, ETYMOLOGICAL, HISTORICAL, GEOGRAPHICAL AND DISCURSIVE, by *Col. Henry Yule* and *A C. Burnell*, new edition by *William Crooke*, 1968. Rs. 75 00

THE KATHA SARIT SAGARA OR OCEAN OF THE STREAMS OF STORY, translated from Sanskrit by *C.H. Tawney*, Rs. 75 00

BHASA : A STUDY by *Dr. A. D. Pusalker*, with a foreword by *Dr. A. Berriedale Keith*. Sceond revised edn., 1967. Rs. 40 00

ORIGIN AND DEVELOPMENT OF VAISNAVISM by *Dr. Suvira Jaiswal*, 1967 Rs. 25 00

SANSKRIT SYNTAX by *Dr. Irach J. S. Taraporewala* Rs. 15 00

A COMPARATIVE GRAMMAR OF THE MODERN ARYAN LANGUAGES OF INDIA by *John Beames*, with Hindi, Punjabi, Sindhi, Gujarati, Marathi, Oriya and Bengali, in one volume, 1970 Edn. Rs. 60 00

THE CONCEPT OF DHARMA IN VALMIKI RAMAYANA by *Dr. Benjamin Khan*, 1965. Rs. 20 00

ESSAYS ON SANSKRIT LITERATURE, by *Prof. Sadhu Ram*, 1965 Rs. 10 00

THE RAMAYANA—A LINGUISTIC STUDY by *Dr. Satya Vrat*, 1964. Rs. 25 00

A SHORT HISTORY OF SANSKRIT LITERATURE by *Prof. Hans Raj Aggarwal*, IInd revised and enlarged edn. Rs. 10 00

A MANUAL OF SANSKRIT PHONETICS by *C. C. Uhlenbeck*, 1960. Rs. 12 50

KALHANA'S RAJATARANGINI or Chronicles of the Kings of Kashmir by *Dr. M. A. Stein*, Vol. 1, Sanskrit text with critical notes, 1960. Rs. 75 00

BOMBAY AND THE MARATHAS, UPTO 1774 by *Prof. W. S. Desai*, 1970 Rs. 26 00

DAVID SCOTT IN N.E. INDIA. A Study in British Paternalism, 1800-1831 by *Dr. Nirode K. Barooah*, 1970. Rs. 39 00

LIFE AND CONDITION OF THE PEOPLE OF HINDUSTAN 1200-1550 A.D. by *Dr. Kunwar Muhammad Ashraf* Rs. 25 00

Munshiram Manoharlal

Oriental and Foreign Booksellers and Publishers

54 Rani Jhansi Road, New Delhi-55

Sales Counter : Post Box 1165, 446, 16 Nai Sarak, Delhi-6